आचार्यप्रथमखण्डस्य

पाठ्यक्रमः

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुण्डी, दाङ ।

आचार्यद्वितीयखण्डस्य

पाठ्यक्रमः

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुण्डी, दाङ ।

विषयसूची

	विषयाः	पृष्ठसङ्ख्याः
१.	शुक्लयजुर्वेदः	३-३६
२.	नव्यव्याकरणम्	३७-५५
३.	नव्यन्यायः	५६-६९
४.	सिद्धान्तज्योतिषम्	७०-८४
५.	साहित्यम्	८५-९५
६.	पूर्वमीमांसा	९६-१३७
७.	शाङ्करवेदान्तः	१३८-१५६
८.	प्राचीनन्यायवैशेषिकम्	१५७-१७२
९.	धर्मशास्त्रम्	१७३-१९७
१०.	फलितज्योतिषम्	१९८-२१३
११.	सर्वदर्शनम्	२१४-२४१
१२.	इतिहासपुराणम्	२४२-२६०
१३.	तन्त्रम्	२६१-२८०

विषयसूची

	विषयाः	पृष्ठसङ्ख्याः
१.	शुक्लयजुर्वेदः	१-२८
२.	नव्यव्याकरणम्	२९-५५
३.	नव्यन्यायः	५६-७५
४.	सिद्धान्तज्योतिषम्	७६-९२
५.	साहित्यम्	९३-११६
६.	पूर्वमीमांसा	११७-१५०
७.	शाङ्करवेदान्तः	१५१-१७०
८.	प्राचीनन्यायवैशेषिकम्	१७१-१९०
९.	धर्मशास्त्रम्	१९१-२०९
१०.	फलितज्योतिषम्	२१०-२३०
११.	सर्वदर्शनम्	२३१-२५५
१२.	इतिहासपुराणम्	२५६-२८०
१३.	तन्त्रम्	२८१-३०३

पूर्वमीमांसा

स्तरगतोद्देश्यम्

१. मीमांसाशास्त्रावगाहिवेदवाक्यार्थनिर्णयात्मकप्रवचनाख्यानस्व-शास्त्रीयेतिहासनिबन्धनतुलनात्मकाध्ययनाध्यापनादिशक्त्यु-त्पादकगभीरजनोत्पादनेन शास्त्रीयविचारानुसन्धानप्रवचनप्रचार-समर्थस्य स्नातकोत्तरस्तरोपयुक्तजनशक्तेः समुत्पादनम् ।

२. वेदप्रतिपादितधर्मानुष्ठानेन सर्वार्थसिद्धिर्भवतीति धर्मानुष्ठानार्थं वेदार्थज्ञानमावश्यकं वेदार्थज्ञानञ्च विचारशास्त्रं (मीमांसाशास्त्रम्) विना न संभवतीति तस्य सर्वजनोपयोगित्वेन तच्छास्त्रस्य विज्ञ-जनस्योत्पादनम् ।

३. वैदिकविचारविषये चतुरस्रवैदुष्यसम्पादनम् ।

४. वैदिकसनातनहिन्दुपरम्परानुसारमनुष्ठेयकर्मसु प्रौढियुक्तदक्षजनो-त्पादनम् ।

५. विधिधर्मप्रमाणकर्मभेदशेषशेषिप्रयुक्तिक्रमाधिकारातिदेशोह-तन्त्रप्रसङ्गविषयकज्ञानसमुपार्जनम् ।

६. विचारशास्त्रस्य लौकिकव्यवहारोपयोगं कर्तुं समर्थस्य जनस्य समुत्पादनम् ।

७. आधुनिकवैज्ञानिकप्रविधौ मीमांसाभिमतविचाराणां प्रमाणनिकष-घर्षणेन सार्थक्यं प्रतिपाद्यास्य शास्त्रस्य सर्वलोकोपयोगित्वस्य प्रमापणम् ।

८. दर्शपूर्णमास-ज्योतिष्टोमादिविविधक्रत्वनुष्ठानविषयकज्ञानस्य समर्जनम् ।

९. आधुनिकशोधविधिविज्ञाने विशिष्टजनशक्तेः समुत्पादनम् ।

१०. प्रवचनेन प्रौढविचाराणामुपस्थापनेन विचारशास्त्रस्योपयोगित्वस्य स्थिरीकरणम् ।

११. शुष्केष्ट्यादिविषयोपस्थापनेन मीमांसाशास्त्रस्य प्रायोगिकज्ञानो-त्पादनम् ।

१२. पूर्वमीमांसाशास्त्रस्य ग्रन्थानामनुसन्धानेन तत्रत्यविषयाणां सारमु-पस्थापयितुं सामर्थ्योत्पादनम् ।

१३. प्राचीनशास्त्रीयसिद्धान्तानां नव्यविचारधारया सह तुलनात्मका-ध्ययनेन नवीनविचारोपस्थापनसामर्थ्योत्पादनम् ।

विषयगतोद्देश्यम्

१. संदिग्धार्थक्रियार्थकाम्नायानां रहस्यपरिज्ञानाय प्रवृत्तमिदं मीमांसाशास्त्रं वेदवाक्यार्थनिर्णयात्मके विधौ प्रवृत्तम् । धर्माख्यस्य विषयस्य प्रतिपादनं मीमांसायाः प्रयोजनमिति । धर्मस्य वेदैक-प्रतिपाद्यत्वेन च धर्मज्ञानार्थं वेदार्थज्ञानस्यावश्यकत्वेन वेद-विषयकसंशयनिराकरणमस्य शास्त्रस्योद्देश्यम् ।

२. धर्मप्रमाणकर्मभेदशेषशेषिप्रयुक्त्यतिदेशोहबाधतन्त्रप्रसङ्ग-प्रमाणप्रतिपादनम् ।

३. कर्मकाण्डाख्यविचारपरकतत्त्वदर्शनमीमांसासम्मतप्रमाण-प्रमेययागप्रयोगविधिशब्दविधिविवेचनम् ।

४. वैदिकयज्ञ-यागादिप्रतिपादनम् ।

५. वेदवाक्यार्थविचारे धर्मभावनाख्याताार्थापूर्वाभिहितान्विताभिधान-वादादिविचारः ।

६. यज्ञे कर्मणि श्रुत्यादिभिरेकप्रयोगान्तर्गतानामङ्गप्रधानानामनुष्ठान-क्रमविवेचनम्, वाजपेयगतेषु पशुष्वैकधर्मसमापनमित्यादिक्रम-विशेषप्रतिपादनञ्च ।

७. पञ्चप्रयाजादीनामावर्तनेनैकादश्यमित्यादिवृद्धिरदब्धग्रहयि-त्रिण्योरनावृत्तिरित्यादिवृद्धिभावः क्रमनियामकानां श्रुत्यर्थपाठादीनां

प्रबलदुर्बलभावश्चेति विवेचनम् ।

८. यज्ञे कर्मण्यधिकारानधिकारविवेचनपूर्वकं सत्राधिकारिणां प्रत्येकं कृत्स्नं फलं भवति नवेति विचारप्रतिपादनम् । दर्शपूर्णमासयोः कर्त्रैक्यनिरूपणपूर्वकं काम्यनित्यकर्मणोः समापनसम्बन्धे निर्णय-विधानम् ।

९. प्रतिनिधिविचारः पदार्थलोपप्रायश्चित्तदीक्षाविचारादिनिरूपणम् ।

१०. सत्रे कस्याधिकारः, सर्वस्वदाने किं देयमदेयमित्यादिनिरूपण-पूर्वकं कस्मिनग्नौ के के होमाः कर्तव्या इत्यादिविचारप्रतिपादन-श्चेति ।

११. द्वादशस्वध्यायेषु विचारणीयानामर्थानामावापोद्वापाभ्यां प्रति-पादनम् ।

पाठ्यक्रमपरिचयः

पत्रनाम	पाठ्यांशनाम	पूर्णाङ्काः	उत्तीर्णाङ्काः
प्रथमपत्रम्	क्रमनियमाधिकारादिविवेचनम्	१००	४०
द्वितीयपत्रम्	सामान्यविशेषातिदेशोहनिरूपणम्	१००	४०
तृतीयपत्रम्	बाधतन्त्रप्रसङ्गादिनिरूपणम्	१००	४०
चतुर्थपत्रम्	धर्मलक्षणप्रमाणकर्मभेदशेषशेषिभाव-पदार्थपरिमाणचिन्तनानुष्ठेयपदार्थानु-ष्ठानक्रमनिरूपणम्	१००	४०
पञ्चमपत्रम्	मीमांसायां प्रभाकरमतम्, शोधपद्धतिश्च	१००	४०

पत्रम् - प्रथमम्

पाठ्यांशनाम- क्रमनियमाधिकारादिविवेचनम्

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	क्रमनिरूपणादिसंख्याविधिप्रयोगन्याय-निरूपणम्	३६	२०
ख	प्रयाजादीनामेकादशादिसंख्यायाः सर्वसम्पाद्य-ताधिकरणात् निषादस्थपतिन्यायाधिकरणान्तम्	३६	२०
ग	सत्रे प्रत्येकस्य सत्रिणः फलसम्बन्धाधि-करणात् प्रधाननिर्वाहकत्वेऽङ्गनिर्वाहापर्याप्त-स्यापि मुख्यस्योपादानाधिकरणान्तम्	३६	२०
घ	अवत्तनाशे पुनरवदानार्थं प्रतिनिध्यादानाधि-करणात् अहर्गणेऽपच्छेदेन सर्वेषामावर्तनाधि-करणान्तम्	३६	२०
ङ	सत्रे समानकल्पानां सहाधिकरणाधिकरणात् छागस्यैवाग्नीषोमीयपशुताधिकरणान्तम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

१) चतुर्थपञ्चमाध्याययोः संगतिविचारः, २) श्रुतिबलीयस्त्व-न्यायः, ३) क्रमस्यक्वचिदार्थिकत्वाधिकरणम्, ४) क्रमस्यक्वचिद-नियमाधिकरणम्, ५) क्रमस्य क्वचित्पाठानुसारिताधिकरणम्, ६) क्रमस्य क्वचित्प्रथमप्रवृत्त्यनुसारिताऽधिकरणम्, ७) क्रमस्य क्वचित्स्थानानु-सारिताऽधिकरणम्, ८) अङ्गक्रमस्य मुख्यक्रमानुसारिताऽधिकरणम्, ९) अङ्गेषु मुख्यक्रमापेक्षया पाठस्य बलवत्त्वाधिकरणम्, १०) ब्राह्मण-पाठान्मत्रपाठस्यबलीयस्त्वाधिकरणम्, ११) प्रयोगवचनाच्चोदकस्य

बलवत्वाधिकरणम्, १२) विकृतौ क्वचित्प्रकृतिधर्माननतिदेशाधिकरणम्, १३) अनुयाजाद्युत्कर्षप्रयाजान्तापकर्षाधिकरणम्, १४) प्रवृत्त्याप्रोक्षण्यादीनां सौमिकपूर्वभाविताऽधिकरणम्, १५) वैकृतयूपकर्ममात्रापकर्षाधिकरणम्, १६) दक्षिणाग्निकहोमानपकर्षाधिकरणम्, १७) पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाधिकरणम्, १८) सन्तापनीयाया अग्निहोत्रानुत्कर्षताऽधिकरणम्, १९) उक्थ्यानुरोधेन षोडश्युत्कर्षाधिकरणम्, २०) वाजपेयपशूनां सर्वेषामेकदोपाकरणादिधर्मानुष्ठानाधिकरणम्, २१) मुष्टिकपालादीनां समुदायानुसमयाधिकरणम्, २२) अवदानस्य प्रदानान्तानुसमयाधिकरणम्, २३) अञ्जनादेः परिव्याणान्तानुसमयाधिकरणम्, २४) दैवताद्यवदानेषु पदार्थानुसमयाधिकरणम्, २५) नानाबीजेष्टौ उलूखलादीनां तन्त्रताऽधिकरणम्, २६) अग्नीषोमीयपशौ प्रयाजानुयाजयोः पात्रभेदाधिकरणम्, २७) नारिष्टहोमस्योपहोमपूर्वताधिकरणम्, २८) विदेवनादीनामभिषेकपूर्वताधिकरणम्, २९) सावित्रहोमादीनां दीक्षणीयपूर्वप्रयोगाधिकरणम्, ३०) याजमानसंस्काराणां रुक्मप्रतिमोकात्पूर्वभाविताधिकरणम्,

ख) प्रकरणे

१) प्रयाजादीनामेकादशादिसङ्ख्यायाः सर्वसम्पाद्यताधिकरणम्, २) प्रथमादीनां तिसृणामुपसदां स्वस्थानावृत्त्यधिकरणम्, ३) सामिधेनीषु आगन्तुकानामन्ते निवेशाधिकरणम्, ४) बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालताधिकरणम्, ५) तत्रैवागन्तूनां साम्नां मध्ये निवेशाधिकरणम्, ६) गृहेष्टकादीनां क्रत्वग्निशेषताधिकरणात् चित्रिण्यादीनां मध्यमचितावुपधानाधिकरणान्तम्, ७) लोकं पृणातः पूर्वं चित्रिण्याद्युपधानाधिकरणम्, ८) इष्टिसंस्कृताग्नावग्निहोत्राद्यनुष्ठानाधिकरणम्, ९) अग्निचिद्वर्षणादिव्रतानां क्रत्वन्तेऽनुष्ठानाधिकरणम्, १०) दीक्षाया इष्टिसिद्धताधिकरणम्, ११) काम्येष्टीनामनियमेनानुष्ठानाधिकरणम्, १२) यज्ञानामग्निष्टोमपूर्वकत्वाधिकरणम्, १३) ज्योतिष्टोमविकाराणामग्निष्टोमपूर्वकत्वाधिकरणम्, १४) सर्वेषामेकानेकस्तौमकानामग्निष्टोमपूर्वकत्वाधिकरणम्, १५) पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वाधिकरणम्, १६) मुख्यक्रमे-

णाग्नेयस्य पूर्वमवदानाद्यनुष्ठानाधिकरणम्, १७) इष्टिसोमयोः पौर्वापर्यानियमाधिकरणम्, १८) ब्राह्मणस्यापीष्टिसोमयोः पौर्वापर्यानियमाधिकरणम्, १९) आज्यस्य सोमादनुत्कर्षाधिकरणात् विकृतानामैन्द्राग्नादीनां सद्यस्कालताऽधिकरणम्, २०) सोमात्सान्नाय्यादीनामुत्कर्षाधिकरणात् सोमविकाराणां दर्शपूर्णमासात्पूर्वमकर्तव्यताऽधिकरणान्तम्, २१) यागादिक्रियाणां स्वर्गफलसाधनताऽधिकरणम्, २२) यागादिषु मनुष्यस्यैवाधिकाराधिकरणम्, २३) यागादिषु स्त्रीपुंसयोरुभयोरधिकाराधिकरणम्, २४) यागे दम्पत्योः सहाधिकाराधिकरणम्, २५) एकस्यैव पुंस आधानाधिकरणम्, २६) पत्न्या यावदुक्ताशीर्ब्रह्मचर्यादावेवाधिकाराधिकरणम्, २७) यागे शूद्रस्यानधिकाराधिकरणम्, २८) यागे निर्धनस्याप्यधिकाराधिकरणात्, दर्शपूर्णमासयोरुत्त्यार्षेयस्यैवाधिकाराधिकरणान्तम्, २९) रथकारस्याधानाधिकरणम्, ३०) निषादस्थपतिन्यायाधिकरणम्।

ग) प्रकरणे

१) सत्रे प्रत्येकस्य सत्रिणः फलसम्बन्धविचारः, २) दर्शादौ कर्तैक्यनियमाधिकरणम्, ३) आरब्धकाम्यकर्मणोऽपि समाप्तिनियमाधिकरणम्, ४) आरब्धलौकिककर्मणः समाप्तेरनियमाधिकरणम्, ५) कलञ्जन्यायाधिकरणम्, ६) गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम्, ७) अग्निहोत्रन्यायाधिकरणम्, ८) अग्निहोत्रादिकर्मणां स्वकालावृत्या आवृत्यधिकरणम्, ९) दर्शादौ भेदाद्यावृत्त्या होमावृत्त्यधिकरणम्, १०) गुर्वनुगमनादीनां प्रवृतिनिमित्तमावृत्त्यधिकरणम्, ११) ब्रह्मक्षत्रविशामृणत्रयापाकरणस्य नित्यताऽधिकरणम्, १२) अथ नित्ये यथाशक्त्यङ्गानुष्ठानाधिकरणम्, १३) अङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम्, १४) द्रव्यभेदेऽपि कर्माभेदाधिकरणम्, १५) नित्यकर्मणोऽनित्यप्रारब्धकर्मणश्च द्रव्यापचारे प्रतिनिधिना समापनाधिकरणम्, १६) देवतामन्त्रक्रियाणामपचारे प्रतिनिध्यभावाधिकरणम्, १७) प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावाधिकरणम्, १८) स्वामिनः प्रतिनिध्यभावाधिकरणम्, १९) सत्रे कस्यचित्स्वामिनोऽपचारे प्रतिनिध्यादानाधिकरणम्,

२०) सत्रे प्रतिनिहितस्यास्वामित्वाधिकरणम्, २१) सत्रे प्रतिनिहितस्य यजमानधर्मग्राहित्वाधिकरणम्, २२) श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम्, २३) द्रव्यापचारे वैकल्पिकद्रव्यान्तरानुपादानाधिकरणम्, २४) पूतीकस्य सोमप्रतिनिधित्वाधिकरणम्, २५) प्रतिनिध्यपचारे उपात्तद्रव्यसदृशस्य पुनः प्रतिनिधित्वाधिकरणम्, २६) श्रुतस्यापि प्रतिनिधेरपचारे उपात्तसदृशस्य पुनः प्रतिनिधित्वाधिकरणम्, २७) मुख्यापचारे तत्प्राप्तौ तस्यैवोपादानाधिकरणात् प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभेऽपि प्रतिनिधिनैव समापनाधिकरणम्, २८) सत्यपि संस्कारयोग्येऽमुख्ये मुख्यस्यैवोपादानाधिकरणम्, २९) प्रयोजनायोग्यस्य मुख्यस्य सत्त्वेऽपि प्रतिनिध्यादानाधिकरणम्, ३०) प्रधाननिर्वाहकत्वेऽङ्गनिर्वाहापर्याप्तस्यापि मुख्यस्योपादानाधिकरणम्।

घ) प्रकरणे

१) अवत्तनाशे पुनरवदानार्थं प्रतिनिध्यादानविचारः, २) स्विष्टकृदर्थस्यावत्तस्य नाशे पुनरवदानविचारः, ३) ऋत्विजामेव शेषभक्षणाधिकरणम्, ४) कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम्, ५) क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम्, ६) एकहविरार्तावपि पञ्चशरावनिर्वापाधिकरणम्, ७) होमाभिषवोभयकर्तुरेवभक्षणाधिकरणम्, ८) पञ्चशरावनिर्वापस्य कर्मान्तरताऽधिकरणम्, ९) पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणात् सत्रायावगूर्याप्रवृत्तस्य विश्वजिदावश्यकताऽधिकरणान्तम्, १०) वर्हिषेत्यादिश्रुतेर्व्रतकालविधानार्थविचारः, ११) वर्हिषेत्यादिश्रुत्युक्तकालस्य सन्नयदसन्नयदुभयसाधारणताऽधिकरणम्, १२) सहशाखयेत्यस्य कालविधानार्थताऽधिकरणम्, १३) दर्शाभ्युदयेष्टौ नैमित्तिकदेवताऽपनयाधिकरणम्, १४) उपांशुयागेऽपि देवतापनयाधिकरणात् अनिरुप्तेऽप्यभ्युदयेष्ट्याधिकरणान्तम्, १५) अनिरुप्येऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणात् किञ्चिन्निरुप्तेऽभ्युदयेऽवशिष्टस्य तूष्णीं निर्वापाधिकरणान्तम्, १६) सन्नयदसन्नयदुभयस्यैवाभ्युदये प्रायश्चित्ताधिकरणात् सत्राय प्रवृत्तमात्रस्य विश्वजिदधिकरणान्तम्, १७) दीक्षापरिमाणस्य द्वादशाहत्वनियमाधिकरणम्, १८) गवामयेन माघपौर्णमास्याः पुरस्ताद्दीक्षाऽधिकरणम्, १९) दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधिकरणम्, २०) ज्योतिष्टोमोत्कर्षे प्रतिहोमाननुष्ठानाधिकरणम्, २१) उदवसानीयोत्कर्षेऽपि प्रतिहोमाननुष्ठानाधिकरणम्, २२) दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधिकरणम्, २३) उदवसानीयोत्कर्षेऽपि प्रतिहोमाननुष्ठानाधिकरणात् षोडशिसंस्थे प्रातरग्निहोत्रप्रभृत्यनुष्ठानाधिकरणान्तम्, २४) भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गाऽधिकरणम्, २५) व्यापन्नशब्दार्थनिर्णयाधिकरणम्, २६) अपच्छेदयौगपद्येऽपि प्रायश्चित्ताधिकरणम्, २७) यौगपद्येऽदाक्षिण्यसर्वस्वदाक्षिण्यविकल्पविचारः, २८) आनुपूर्व्येणापच्छेदे उत्तरापच्छेदनिमित्तकप्रायश्चित्तानुष्ठानविचारः, २९) उद्गातुरुत्तरापच्छेदेऽपि सर्वस्वदक्षिणादानाधिकरणम्, ३०) अहर्गणे अपच्छेदेन सर्वेषामावर्तनाधिकरणम्।

ङ) प्रकरणे

१) सत्रे समानकल्पानां सहाधिकारविचारः, २) भिन्नकल्पयोरपि राज्ञःपुरोहितस्य च कुलाययज्ञेऽधिकारनिरूपणम्, ३) सत्रे ब्राह्मणमात्रस्याधिकारविचारः, ४) सत्रे विश्वामित्रतसमानकल्पानामेवाधिकारविचारः, ५) सत्रे आहिताग्नेरेवाधिकारनिरूपणम्, ६) जुह्वादीनां साधारण्याधिकरणम्, ७) विकृतसप्तदशसामिधेनीषु वर्णत्रयाधिकाराधिकरण, ८) विश्वजिति पित्रादीनामदेयत्वाधिकरणम्, ९) विश्वजिति पृथिव्या अदेयत्वाधिकरणम्, १०) विश्वजिति अश्वादीनामदेयत्वाधिकरणम्, ११) विश्वजिति विद्यमानामेव सर्वस्वानां दानाधिकरणम्, १२) विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताऽधिकरणम्, १३) विश्वजिति दक्षिणाकालविद्यनानामेव सर्वस्वानां देयताऽधिकरणम्, १४) विश्वजिति द्वादशशतन्यूनधनस्यानधिकाराधिकरणम्, १५) आधानेऽपरिमितं देयमित्यनेन संख्यान्तरविधानाधिकरणम्, १६) अपरिमितशब्देन सहस्राधिकस्य ग्रहणाधिकरणम्, १७) इति हस्मेत्यादिपरकृतिपुराकल्पनामर्थवादताऽधिकरणम्, १८) सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताऽधिकरणम्, १९) अथानाहिताग्नेरेव चतुर्होतृहोमाधिकारविचारः, २०) अनाहिताग्निषूपनयनहोमाधिकरणम्, २१) अनाहितेऽग्नौ स्थपतीष्ट्यधिकरणम्, २२) अनाहिते-

ऽग्नावव‍कीर्णिपश्वनुष्ठानाधिकरणम्, २३) देवकर्मणामुदगयनादिकालताऽधिकरणम्, २४) पित्र्यकर्मणोऽपरपक्षादिकालताधिकरणम्, २५) ज्योतिष्टोमाङ्गयाच्ञाक्रयणोर्नित्यताऽधिकरणम्, २६) ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यताऽधिकरणम्, २७) अहर्गणस्थेऽपि विश्वजिति सर्वस्वदानाधिकरणम्, २८) विश्वजिति दक्षिणादानोतराङ्गानामनुष्ठानाधिकरणम्, २९) अपररात्रे व्रतस्यानियमाधिकरणम्, ३०) छागस्यैवाग्नीषोमीयपशुताऽधिकरणम् ।

पाठ्यग्रन्थः

१. शास्त्रदीपिकायाः पञ्चमषष्ठाध्यायौ ।
(पार्थसारथिमिश्रविरचितायाः)

सहायकग्रन्थाः

१. शाबरभाष्यस्य पञ्चमषष्ठाध्यायौ । शबरस्वामिविरचितस्य ।
२. शाबरभाष्यस्य पञ्चमषष्ठाध्यायान्तर्गता कुमारिलभट्टटीका ।
३. मीमांसासूत्रस्य कुतूहलवृत्तेः पञ्चमषष्ठाध्यायौ ।
४. मीमांसामयूखः, चूडानाथकृतः ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् – द्वितीयम्

पाठ्यांशनाम – सामान्यातिदेशविशेषातिदेशसामोहसंस्कारोहमन्त्रोहादिविचारः

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	सामान्यतोऽतिदेशनिरूपणप्रकरणम्, प्रयाजादिधर्माणामपूर्वप्रयुक्ततविचारतो गवामयन ऐकाहिकेतिकर्तव्यतानुष्ठानप्रतिपादनान्तं प्रकरणम्	३६	२०
ख	विशेषतोऽतिदेशनिरूपणम्(विशेषचिन्तानिरूपणतो दर्विहोमशब्दस्यापूर्वतानिरूपणान्तं – प्रकरणम्)	३६	२०
ग	ऊहचिन्ताप्रकरणम्	३६	२०
घ	गीतीनां सामनामता प्रतिपादनतः समिदादीनां – नामधेयताप्रतिपादनान्तं प्रकरणम्	३६	२०
ङ	विकृतौ मन्त्रगतव्रीह्यादिशब्दानामूह इति – प्रतिपादनत आज्येन शेषं संस्थापयतीत्यनेन – कर्मान्तरविधानमिति प्रतिपादनान्तम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

प्रयाजादिधर्माणामपूर्वप्रयुक्तताविचारे यजिप्रयुक्ताधर्मा उतापूर्वप्रयुक्ता इति विचारः, इषावेकाहे यागे श्येनीयविशेषधर्मातिदेशविचारः, पञ्चहविष्षु सार्थवादविध्यतिदेशविचारः, एककपालैन्द्राग्नयोः सार्थवादविध्यतिदेशनिरूपणम्, साकमेधे वारुणप्रघासिकैककपालातिदेशप्रतिपादनम्, रथन्तरादिशब्दानां गानविशेषार्थताप्रतिपादनम्, अग्निहोत्रादिनाम्ना धर्मातिदेश इति प्रतिपादनम् (नामातिदेशप्रतिपादनम्), प्रायणीय–

नाम्ना धर्मानतिदेश इति प्रतिपादनम्, सर्वपृष्ठशब्देन षट्पृष्ठानामतिदेश इति प्रतिपादनम्, अवभृथनाम्ना सौमिकधर्मातिदेशप्रतिपादनम्, वारुणप्रघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वमिति प्रतिपादनम्, वैष्णवशब्दातिदिश्यधर्मानतिदेश इति प्रतिपादनम्, निर्मन्थ्यादिशब्दैर्धर्मानतिदेश इति प्रतिपादनम्, प्रणयनशब्देन सौमिकधर्मानतिदेश इति प्रतिपादनम्, मध्यमयोर्द्वयोरेव प्रणयनमिति प्रतिपादनम्, स्वरसामादिशब्देन धर्मातिदेश इति प्रतिपादनम्, वासो ददातीत्यादौ वास आदिशब्दानामाकृतिनिमित्ततेति प्रतिपादनम्, गर्गत्रिरात्रे लौकिकेऽग्नावुपनिधानमिति प्रतिपादनम्, उपशये यूपशब्दस्य संस्कार प्रयोजकता न वेति विचारः, पृष्ठशब्दस्य ऋङ्मन्त्रवाचित्वप्रतिपादनम्, सौर्ये चरावितिकर्तव्यता गवामयने ऐकाहिकेतिकर्तव्यता प्रतिपादनम् ।

ख) प्रकरणे

एकस्मिन् कर्मणि सर्वधर्मातिदेश उत नेति विचारः, विशेष कर्मणो धर्मातिदेशविचारः, सोमे ऐषिकधर्मानतिदेश इति प्रतिपादनम्, ऐन्द्राग्नादावैष्टिकधर्मातिदेशप्रतिपादनम्, अग्नीषोमीयपशौ दार्शपूर्णमासिकधर्मातिदेशप्रतिपादनम्, सवनीयपशावग्नीषोमीयधर्मातिदेशप्रतिपादनम्, ऐकादशिनपशौ समानधर्मातिदेशनिरूपणम्, पशुगणेषु ऐकादशिनधर्मातिदेशनिरूपणम्, अव्यक्तपशौ सौमिकधर्मातिदेशप्रतिपादनम्, अहर्गणेषु द्वादशाहिकधर्मातिदेशप्रतिपादनम्, संवत्सरसत्रेषु गवामयनिकधर्मातिदेशप्रतिपादनम्, निकायिनामुत्तरेषु पूर्वनिकायिधर्माति देश इति प्रतिपादनम्, फलादीनामनतिदेश इति प्रतिपादनम्, गुणकामानां गोदोहनादीनामनतिदेश इति प्रतिपादनम्, सौर्ये चरावभिमर्शनद्वयस्य विकल्प इति प्रतिपादनम्, सौर्ये चरावाग्नेयधर्मातिदेशप्रतिपादनम्, हविर्देवतयोः सन्निपाते हविः सामान्यस्य बलीयस्त्वप्रतिपादनम्, शतकृष्णलाख्यहिरण्ये औषधधर्मातिदेशप्रतिपादनम्, मधूदके उपांशुयाज्यधर्मातिदेशप्रतिपादनम्, स्पष्टलिङ्गातिदेशप्रतिपादनान्तरमस्पष्टलिङ्गातिदेशप्रतिपादनपरपादान्तरोपस्थापनम्, तत्र (वाजिनयागे सुराग्रहयागे च) ऐष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशप्रतिपादनम्, अग्नीषोमीयपशौ

सान्नाय्यधर्मातिदेश इति प्रतिपादनम्, अग्नीषोमीयपशौ पयोधर्मातिदेश इति प्रतिपादनम्, आमिक्षायागे पयोयागधर्मातिदेश इति प्रतिपादनम्, द्वादशाहे सत्राहीनयोर्व्यवस्थया धर्मातिदेश इति प्रतिपादनम्, पञ्चदशरात्रादिषु सत्रधर्मातिदेश इति प्रतिपादनम्, शुचिदेवके आग्नेयस्य आग्नावैष्णवे चाग्नीषोमीयधर्मातिदेशनिरूपणम्, जनकसप्तरात्रे त्रिवृत्स्वहःसु द्वादशाहधर्मातिदेशप्रतिपादनम्, षट्त्रिंशद्रात्रे षड्धर्माति देशप्रतिपादनम्, संस्थाशब्देषु द्वादशाहिकधर्मातिदेशप्रतिपादनम्, शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोप्रचयनिरूपणम्, गायत्रीषूत्पत्तिगायत्रीणामतिदेशप्रतिपादनम्, दर्विहोमस्यकर्मनामधेयत्वप्रतिपादनम्, दर्विहोमशब्दस्यापूर्वताप्रतिपादनम् ।

ग) प्रकरणे

अग्निहोत्रादीषूक्तानां धर्माणामपूर्वप्रयुक्तत्वप्रतिपादनम्, वाक्यविनियुक्तानां प्रोक्षणादिसन्निपात्योपकाराणामपूर्वप्रयुक्तत्वप्रतिपादनम्, फलदेवतासंबद्धधर्माणामपूर्वप्रयुक्तत्वप्रतिपादनम्, अपूर्वप्रयुक्ताधर्माः, कर्मण एवापूर्वद्वारं फलमिति प्रतिपादनम्, (धर्माणां देवताप्रयुक्तत्वाभावप्रतिपादनम्), प्रोक्षणादीनामपूर्वप्रयुक्तत्वप्रतिपादनम्, अग्नीषोमीयात् प्राचीनानामङ्गानामुपांशुत्वप्रतिपादनम्, इष्टकासु सकृद्विकर्षणाद्यनुष्ठानमिति प्रतिपादनम्, पत्नीसंयाजान्तान्यहानीति श्रुतौ सर्वेषामह्नां पत्नीसंयाजान्तत्वमुतोत्तमवर्जमिति विवेचनम्, सामधेनीनामभ्यासस्य स्थानधर्मताप्रतिपादनम्, (सामधेनीषु त्रिरभ्यासस्य प्रथमोत्तमस्थानत्वप्रतिपादनम्), दर्शपूर्णमासप्रकरणे आम्नाता आरम्भणीयेष्टिः दर्शपूर्णमासावृत्तावावर्तेत उत सकृदेवादौ स्यादिति संशयविवेचनम्, निराकरणञ्च, निर्वापादिमन्त्रे सावित्रादिपदानामनूह इति प्रतिपादनम्, अग्नयेजुष्टं निर्वपामीत्यत्रग्निशब्दः किमसमवेतेनोहितव्य उत समवेतवचन ऊहितव्य इति विवेचनम्, इडोपह्वानमन्त्रे यज्ञपतिशब्दस्यानूह इति प्रतिपादनम्, सुब्रह्मण्याह्वानमन्त्रे हरिवच्छब्दस्यानूह इति प्रतिपादनम्, सारस्वत्यां मेष्यां देव्या शमितार इत्यस्य निगदस्योहो भवति न वेति विवेचनम्, यज्ञायज्ञिये गिराशब्दस्य स्थाने इराशब्दःप्रयोक्तव्य इति प्रतिपादनम्, इरापदं प्रगीतं प्रयोक्त-

व्यमप्रगीतं वेति विचारः ।

घ) प्रकरणे

गीतीनां सामनामता प्रतिपादनम् (सामोहचिन्तनस्य प्रारम्भः), सामानि किमृचं प्रति प्रधानभूतानि उत तत्संस्कारार्थानि गुणभूतानीति विचारः, तृचे प्रत्यृचं कृत्स्नसाम्नः समाप्तिरिति प्रतिपादनम्, तिसृषु ऋक्षु गीयमानं साम किं समासु विषमासु चानियमेन गेयमुत समच्छन्दस्कास्वेवेति विवेचनम्, उत्तरयोर्गायतीत्यत्र उत्तराग्रन्थस्थयोर्ऋचोर्ग्रहणमिति प्रतिपादनम्, बृहती पङ्क्त्योरेव प्रग्रथनेनरथन्तरस्य गानमिति प्रतिपादनम्, गीतिसम्पादकाक्षरविकारादीनां विकल्प इति प्रतिपादनम्, ऋक्सामाभ्यां विकल्पेन स्तुतिरथवा साम्नैवेति विचारः, उत्तरवर्णवशेन गानमिति प्रतिपादनम्, सामातिदेशे किं स्तोभानामतिदेशोऽस्ति न वेति संशय विवेचनम्, स्तोभलक्षणप्रतिपादनम्, नीवारादिषु प्रोक्षणावघातानुष्ठानप्रतिपादनम्, परिधौ यूपधर्मानुष्ठानमिति प्रतिपादनम्, शृतादौ प्रणीताधर्मानुष्ठानमिति प्रतिपादनम्, बृहद्रथन्तरयोर्घर्मव्यवस्थाप्रतिपादनम्, कण्वरथन्तरे बृहद्रथन्तरधर्मसमुच्चयप्रतिपादनम्, दर्शपूर्णमासयोर्होमद्वयस्य व्यवस्था प्रतिपादनम्, समिदादीनां यागनामधेयता प्रतिपादनम् ।

ङ) प्रकरणे

विकृतावतिदिष्टे मन्त्रे मन्त्रगतव्रीह्यादिशब्दानामूह इति प्रतिपादनम्, पौण्डरीकेषु बर्हिःषु स्तरणमन्त्रोहप्रतिपादनम् (बर्हिस्तरणमन्त्रे रक्तपदोहप्रतिपादनम्), अग्नीषोमीयपशौ लौकिकयूपस्पर्शप्रायश्चित्तप्रतिपादनम् (लौकिके यूपस्पर्शे प्रायश्चित्ताभिधानम्), द्विपशुयागे पाशमन्त्रयोरेकवचनान्तबहुवचनान्तयोर्द्विवचनान्तेनोह इति प्रतिपादनम्, अग्नीषोमीयपशौ पाशैकत्वपाशबहुत्वाभिधायिमन्त्रयोर्विकल्पप्रतिपादनम्, दर्शपूर्णमासयोरनेकपत्नीप्रयोगे 'पत्नीं सन्नह्य' इति मन्त्रस्यानूह इति प्रतिपादनम्, विकृतावपि अनेकपत्नीप्रयोगे पत्नीं संनह्येति मन्त्रस्यानूह इति प्रतिपादनम्, सवनीयपशूनामग्नीषोमीयसमानविधानत्वे प्रास्मै अग्निमिति मन्त्रे अनूह इति प्रतिपादनम्, द्विपशुयागे सूर्यश्चक्षुर्गमयतादिति मन्त्राणामनूह-

प्रतिपादनम्, द्विपशुयागे अध्रिगुप्रैषे (अप्रतिहतगतिप्रैषे) एकधेत्यस्यशब्दस्याभ्यास प्रतिपादनम्, द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतापरत्वमिति प्रतिपादनम्, मेधपतिशब्दस्य देवतानुसारेणोह इति प्रतिपादनञ्च, बहुदेवत्य पशावेकवचनान्त मेधपतिशब्दस्य विकल्पेनोह इति प्रतिपादनम्, एकादशिन्यायेनैकवचनान्तमेधपतिशब्दस्योह इति प्रतिपादनम्, अनेक पशुकायां विकृतौ षड्विंशतिरस्य वङ्क्रयः (पार्श्वास्थीनि) इत्यादौ पञ्चपक्षा इति विवेचनम्, समस्योहप्रतिपादनञ्च, आश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद् वङ्क्रिरूपविशेषवचनविकल्पप्रतिपादनम्, अग्नीषोमीयपशौ उरूकशब्देन वपाभिधानमिति प्रतिपादनम्, अध्रिगौ (अक्षतगमनेअप्रतिहतगतौ) प्रैषे श्येनादिशब्दानां साकल्यवचनमिति प्रतिपादनम्, दर्शार्थोद्धृताग्निलोपे प्रायश्चित्तरूपज्योतिष्मत्याऽननुष्ठानमिति प्रतिपादनम्, यदास्य ध्रियमाणेऽग्निरग्निहोत्रकाले उद्वाति तदा किमिष्टिः कार्या नेति सन्देह विवेचनम्, तस्याग्नेरुद्वाने प्रायश्चित्तरूपज्योतिष्मत्यननुष्ठानमिति प्रतिपादनञ्च, दर्शार्थोद्धरणस्य अमन्त्रकत्वमिति प्रतिपादनम्, प्रायणीयचरौ प्रदानधर्माणामननुष्ठानमिति प्रतिपादनम्, अभ्युदयेष्टौ दधिशृतयो प्रदेयधर्मानुष्ठानमिति प्रतिपादनम्, जोतिष्टोमे श्रवणानां प्रदेयधर्माननुष्ठानमिति प्रतिपादनम्, ईशानाय परस्यत इत्यत्र यागान्तरविधानमिति प्रतिपादनम्, आज्येन शेषं संस्थापयतीत्यनेन कर्मान्तरविधानमिति प्रतिपादनम् ।

पाठ्यग्रन्थः

१. शास्त्रदीपिका (शास्त्रदीपिकायाः सप्तमाष्टमनवमाध्यायाः)

सहायकग्रन्थाः

१. मीमांसामयूख – प्रा. चूडानाथभट्टरायः ।
२. मीमांसासूत्रस्य शाबरभाष्यम् सप्तमाष्टमनवमाध्यायात्मकम् ।
३. अध्वरमीमांसायाः कुतूहलवृत्तेः सप्तमाष्टमनवमाध्यायाः ।
४. तन्त्ररत्नस्य पार्थसारथिमिश्रविरचितस्य सप्तमाष्टमनवमाध्यायाः

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्या:		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - तृतीयम्

पाठ्यांशनाम - बाधतन्त्रप्रसङ्गादिनिरूपणम्

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	विकृतौ लुप्तार्थानां प्राकृतानां बाध इति विचारतः- वाजपेयस्थस्य भागनियामकताविचारान्तं प्रकरणम्	३६	२०
ख	नारिष्टहोमादिभिर्नक्षेत्रेष्ट्यादीनां समुच्चय- प्रतिपादनतः पृषदाज्यकानुयागेषु आज्य - शब्दस्य बाधाभावप्रतिपादनान्तम्	३६	२०
ग	एकदेशग्रहणे प्राथमिकानामेव ग्रहणमितिप्रतिपाद- नतः एकपुरोडाशायामपि उपांशुयाजप्रतिपादनान्तम्	३६	२०
घ	तन्त्रावापनिरूपणम्	३६	२०
ङ	अग्निषोमीयप्रयाजादिभिः पुरोडाशस्योपकार- इति प्रतिपादनतो ब्राह्मणस्यैवार्त्विज्याधिकार इति प्रतिपादान्तम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

विकृतौ लुप्तार्थानां प्राकृतानां बाध इति प्रतिपादनम्, दीक्षणीयादिषु आरम्भणीयाबाध इति प्रतिपादनम्, अनुयाजादिष्वारम्भणीयाबाध- प्रतिपादनम्, आरम्भणीयायामारम्भणीयाबाधप्रतिपादनम्, खलेवाल्यां यूपाहूतिबाधप्रतिपादनम्, खलेवाल्यां स्थाण्वाहुतिबाधप्रतिपादनम्, उत्तमप्रयाजस्य संस्कारकर्मताप्रतिपादनम्, अग्नियागस्यारादुपकारकत्व- प्रतिपादनम्, पशुपुरोडाशस्य देवतासंस्कारकर्मताप्रतिपादनम्, चरुशब्दस्यौदनवाचित्व प्रतिपादनम्, सौर्यचरोः स्थाल्यामेवपाक इति प्रतिपादनम्, सौर्यचरौ पेषणाभावप्रतिपादनम्, कृष्णले चरौ पाठानुष्ठान- प्रतिपादनम्, कृष्णले उपसारणनिधारणयोर्बाध इति प्रतिपादनम्, कृष्णले भक्षसहभावप्रतिपादनम्, कृष्णले सपरिहारविधानविचारः, कृष्णले सर्वभक्षं किमिति प्रतिपादनम्, भक्षभागानां स्वस्वकाले भक्षणमिति प्रतिपादनम्, ब्रह्मभक्षे चतुर्धाकरणादीनामभावप्रतिपादनम्, ऋत्विग्दानस्य स्वयं कर्तृककर्मसु बाधप्रतिपादनम्, सत्रे परिक्रयबाधप्रतिपादनम्, उदवसानीये दक्षिणादानादीनां बाधप्रतिपादनम्, उदवसानीये ऋत्विजोः सत्रिभ्यो भिन्नताप्रतिपादनम्, उदवसानीये सत्रिभ्योऽन्येषाम्, ऋत्विक्त्व- प्रतिपादनम्, सारस्वतकामेष्टौ श्रूयमाणस्य दानस्य पूर्वार्थत्वप्रतिपादनम्, दर्शपूर्णमासयो र्द्वैष्यायदानस्यादृष्टतार्थताप्रतिपादनम्, अस्थियज्ञे जीवतामधिकार इति प्रतिपादनम्, अस्थियागे इष्टिजपसंस्काराणां बाधप्रतिपादनम्, अस्थियज्ञे शुक्रान्वारम्भणादीनां बाधाभावप्रतिपादनम्, अस्थियज्ञे पुरुषार्थानां काम्यकर्मणां बाधप्रतिपादनम्, अस्थियज्ञे सूक्त- वाकगताशासनबाधप्रतिपादनम्, अस्थियज्ञे होतृकानां निवृत्तिप्रतिपादनम्, सर्वस्वारे मरणोत्तरभाविन्नामङ्गानां बाधाभावप्रतिपादनम्, सर्वस्वारे यजमानस्य मरणेऽपि समापनप्रतिपादनम्, सर्वस्वारे कार्यबाध्यव्यवस्था- प्रतिपादनम्, सर्वस्वारे यजमाने मृतेऽप्यायुराशंसनस्य बाधाभाव- प्रतिपादनम्, धेन्वादिशब्दानां गोवाचित्वप्रतिपादनम्, (द्यावापृथिव्या- दावुपदिष्टगोद्रव्येणाजबाधप्रतिपादनम्), वायव्यं श्वेतमित्यत्राजस्यैवा-

लम्भनप्रतिपादनम्, खलेवालीतण्डुलयो खादिरब्रैह्यादिनियमप्रतिपादनम्, खले वाल्यां तक्षणादीनां बाधे विचारः, खलेवाल्यां पर्यूहणादिसंस्काराणां बाधप्रतिपादनम्, महापितृयज्ञे धानास्ववघातबाधाभावप्रतिपादनम्, भाष्यकारमते वार्तिकमतेन धानासु श्रपणस्य पेषणस्य प्राप्तौ विचारः, पश्चादौ सामिधेन्यादिप्राकृतेतिकर्तव्यनुष्ठानप्रतिपादनम्, हिरण्यगर्भ-मन्त्रस्योत्तराधारगुणताप्रतिपादनम्, चातुर्मास्येषु सोमेषु वाजिनासादनादीनां प्राकृतगुणविधित्व प्रतिपादनम्, अग्निचयने प्राकृतवैकृतोभय समुच्चय-प्रतिपादनम्, पुनराधानेऽग्याधान दक्षिणानां निवृत्तिप्रतिपादनम्, आग्रयणे वासोवत्साभ्यामन्वाहार्यनिवृत्तिप्रतिपादनम्, आग्रायणे वासोवत्सयोरन्वा-हार्यधर्मानुष्ठानप्रतिपादनम्, आग्रायणे वत्से पाकाभावप्रतिपादनम्, आग्रयणे वाससि पाकाभावप्रतिपादनम्, आग्रयणे वासोवत्सयोरभिघारणाभाव-प्रतिपादनम्, ज्योतिष्टोमे गवामेव द्वादशशतदक्षिणात्वप्रतिपादनम्, गोदक्षिणाया विभज्यदानप्रतिपादनम्, ज्योतिष्टोमे समाख्यानुसारेण दक्षिणाविभागप्रतिपादनम्, धेनुदाने भूनाम्नि निखिलदक्षिणाबाध-प्रतिपादनम्, एकगामित्यनेन गोगतसंख्या प्रतिपादनम्, साद्यस्केत्रिवत्सेन सोमक्रयसाधनमात्रवाधाधिकरणम्, अश्वमेधे प्राकाशेनाध्वर्युभागबाध-प्रतिपादनम्, उदहव्ये श्यावाश्वेनाखिल दक्षिणाबाधप्रतिपादनम्, सोमचमसेन कृत्स्नदक्षिणापुरुषान्तरयोर्बाधप्रतिपादनम्, सोमचमसेन दक्षिणाद्रव्यस्य बाधे ब्रह्मणे चमसो दातव्य इतरेभ्यस्तु दक्षिणा न देयेति प्रतिपादनम्, (वाजपेयेरथस्य भागनियमकता प्रतिपादनम्)।

ख) प्रकरणे

नारिष्टहोमादिभिर्नक्षत्रेष्ट्यादीनां समुच्चयप्रतिपादनम्, वार्हस्पत्य-ग्रहादिभिः प्राकृतेन्द्रवाय्वादिग्रहाणां समुच्चयप्रतिपादनम्, वाजपेये प्राजापत्यपशुभिः क्रतुपशूनां समुच्चयप्रतिपादनम्, सांग्रहणीष्टौ आमनहोमैरनुयाजानां समुच्चयप्रतिपादनम्, महाव्रते पत्न्युपगानेनर्त्वि-गुपगानस्य समुच्चयप्रतिपादनम्, अञ्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गौग्गुलाभ्यञ्जनादिभिः समुच्चयप्रतिपादनम्, महाव्रते अहतवासस्तार्या-दिभिः समुच्चयप्रतिपादनम्, महाव्रते रथान्तरादिसाम्नां श्लोकादिसामभिः

समुच्चयप्रतिपादनम्, प्रकृतिविशेषे प्राकृतसाम्नां कौत्सादिभिः बाध-प्रतिपादनम्, विवृद्धाविरुद्धस्तोमक्रतुषु प्राकृतसामबाधाबाधप्रतिपादनम्, पवमाने विवृद्धाविवृद्धस्तोमक्रतूनां सामावापोद्वापप्रतिपादनम्, यागहोमादिषूपदिष्टेन शब्देनैव देवतोच्चारणनियमप्रतिपादनम्, अतिदिष्ट-स्थलेऽपि वैधशब्देनैव देवाभिधानप्रतिपादनम्, सगुणदेवतानामावाहनादिषु सगुणदेवताशब्दोच्चारणप्रतिपादनम्, आधानाज्ययोरग्नेर्निर्गुणेनाभिधान-प्रतिपादनम्, आज्यभागयोर्निर्गुणदेवताशब्दोच्चारणप्रतिपादनम्, विधिगतोस्त्रावनस्पतिशब्दाभ्यामेव द्रव्यदेवताभिधानप्रतिपादनम्, अवभृथे सगुणयोरग्निवरुणयोरभिधानप्रतिपादनम्, अग्निषोमीयपशौ सर्वत्रैव प्रयोगे निर्गुणेनाग्निशब्देनाग्नेरभिधानप्रतिपादनम्, अनुयाजेषु स्विष्टकृद्यागस्य संस्कारकर्मताप्रतिपादनम्, दर्शपूर्णमासयोर्याज्यापुरोनुवाक्ययोः संस्कार-कर्मताप्रतिपादनम्, मनोतायामहाभावप्रतिपादनम्, मनोतायामग्निशब्दस्य बाधाभावप्रतिपादनम्, कण्वरथन्तरस्य स्वयोनौ गानप्रतिपादनम्, (कण्व-रथन्तरस्य स्वयोन्युत्तरयोर्बाधाभावप्रतिपादनम्), अग्निष्टुति (विकृतिषु) स्तुतशस्त्रयोरविकारप्रतिपादनम्, चातुर्मास्येषु आज्यशब्दस्य विकारेणा-वाहनप्रतिपादनम्, (पृषदाज्यकानुयाजेषु आज्यशब्दस्यबाधाभाव-प्रतिपादनम्)।

ग) प्रकरणे

रथन्तरादीनां साम्नां तृचे गानमिति प्रतिपादनम्, स्वर्दृक्शब्देन वीक्षणस्य कालार्थताप्रतिपादनम्, गवामयने पृष्ठ्यषडहे बृहद्रथन्तरयो-र्विभागप्रतिपादनम् (केषुचिदहःसु एकं साम, केषुचिदपरमिति प्रतिपादनम्), प्रायणीयोदयनीययोरैकादशिनां विभागप्रतिपादनम्, प्रापणीये, पञ्च, उदयनीये च षडिति विभागेन पशवः, कर्तव्या इति प्रतिपादनम्, सर्वपृष्ठे देशविशेषव्यवस्थाप्रतिपादनम्, षड्भिःसामभिः-पृष्ठस्तोत्रे निष्पादिते वचनानुसारमेकस्य पृष्ठकार्ये निवेशोऽन्येषामन्यत्र परिसामकार्ये इति प्रतिपादनम्, वैरूपवैराजसाम्नोः पृष्ठकार्ये निवेश-प्रतिपादनम्, तृवृति स्तोमगतसंख्याविकारप्रतिपादनम् (स्तोमस्यैव-त्रिवृत्त्वमिति प्रतिपादनम्, उभयसाम्निबृहद्रथन्तरयोः समुच्चय-

प्रतिपादनम्, द्वैपृष्ठे द्वयोरेव साम्नोः समुच्चयेन प्रतिपादनम्) मध्वशनघृताशनयोः षडहान्तेऽनुष्ठानप्रतिपादनम्, षडहान्ते यथा प्रकृतौ तथैव विकृतावपि भोजनम् मधुनो घृतस्य वेति प्रतिपादनम्) षडहावृत्तावपि मध्वशनघृताशनयो सकृदेवानुष्ठानमिति प्रतिपादनम्, गवामयने मध्वाशनघृताशनयोः प्रतिमाससमावृत्तिप्रतिपादनम्, षडहपञ्चक-रूपप्रतिमासं समाप्तानां षडहानां पृथक्त्वाद् भोजनमप्यावर्तनीयमिति प्रतिपादनम्, द्वादशाहे सत्रिभिरपि मध्वशनमिति प्रतिपादनम् (सत्रिणां ब्रह्मचर्येऽपि मध्वशनप्रतिपादनम्), मानसस्य द्वादशाहाङ्गताप्रतिपादनम्, (द्वादशाहाङ्गतामेव मानसमिति प्रतिपादनम्), सत्रस्य बहुकर्तृकत्व प्रतिपादनम्, सत्रे यजमानानामेवर्त्विक्त्वमिति प्रतिपादनम्, सत्राहीनयो-र्विवेकप्रतिपादनम्, (द्वादशाहस्य सत्रत्वं यजतिचोदनेष्वहर्गणेषु अहीनत्व-मिति प्रतिपादनम्), पौण्डरीके सकृदेव दक्षिणादानप्रतिपादनम्, (एका-दशदिनव्यापिनि पौण्डरीकयागे न प्रतिदिनं किन्तु कर्मान्ते सकृदेव दक्षिणा-दानमिति प्रतिपादनम्, पौण्डरीके सर्वासां दक्षिणानां विभज्यनयनमिति प्रतिपादनम्, मानवीषु पञ्चदशानामेव सामिधेनीत्वप्रतिपादनम्, (अग्नि-समिन्धनमेव सामिधेनीनां कार्यम् यावतीभिः सिद्ध्यति तावत्यः प्रयोक्तव्या इति प्रतिपादनम्), वाससि मानोपाहरणयोरनुष्ठानमिति प्रतिपादनम् (सोमस्य मानम् उपाहरणञ्च वस्त्रेण कार्यमिति प्रतिपादनम्) अहर्गणे वासोन्तरोत्पादनप्रतिपादनम् (द्वादशदिनेषु प्रत्यहं सोमस्योपाहरणं वस्त्रभेदेन संभवतीति प्रतिपादनम्) उपाहरणार्थमेव वासोन्तरोत्पादनम्, न मानार्थमिति प्रतिपादनम्, ज्योतिष्टोमे प्रत्यङ्गहविर्भेदप्रतिपादनम् (अग्नीषोमीये पशौ प्रत्यङ्गं होमद्रव्यमिति प्रतिपादनम्, पशोर्हृदयादिभिरे-वाङ्गविशेषैर्याग इति प्रतिपादनम्, दोष्णः पूर्वार्द्धाद् गुदस्य मध्यतः श्रोण्या जघनत इत्यत्र हृदयाद्येकादशभ्योऽन्यान्यङ्गानि त्रिणि स्विष्टकृते समाम्नायन्ते तैरयागशेषैरङ्गैः कर्तव्य इति प्रतिपादनम्।

अध्यूध्न्या इडाविकारताप्रतिपादनम् (अध्यूध्नी हृदयादिभ्योऽन्य-दङ्गम् अध्यूध्नी होतृभागस्य विकार इति प्रतिपादनम्), वनिष्टोर्भक्ष-विकारताप्रतिपादनम् (वनिष्टुव्यतिरिक्तोऽअग्नीद् भागो बाध्यत इति

वनिष्टुरग्नीद्भागस्य विकार इति प्रतिपादनम्, वनिष्टुस्थूलान्त्रम्), मैत्रावरुणस्यर्त्विजोऽपि शेषभक्षास्तित्वप्रतिपादनम्, मैत्रावरुणस्यैक-भागताप्रतिपादनम्, प्रतिप्रस्थातुर्भक्षाभावप्रतिपादनम्, गृहमेधीयके-ऽपूर्वाज्यभागविधानप्रतिपादनम्, गृहमेधीयकं यावदुक्ताङ्ग युतं प्रकुर्यादिति प्रतिपादनम्, अपूर्वार्थ एवायं गहमेधीय इति प्रतिपादनम्, गृहमेधीये स्विष्टकृदाद्यनुष्ठानप्रतिपादनम्, गृहमेधीये प्राशित्रादिभक्षणाभाव-प्रतिपादनम्, प्रायणीयातिथ्योः शंय्विडान्ततानियमप्रतिपादनम् (आतिथ्ये-ष्टिरूपं कर्म इडान्तमेवकर्तव्यमिति प्रतिपादनम्), प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंय्विडाभ्यां संस्थाप्रतिपादनम् (पूर्वेड्या एव आतिथ्येष्ट्या उपरम इति प्रतिपादनम्), उपसदामपूर्वार्थप्रतिपादनम् (उपसदोऽपूर्वाणि कर्माणीति प्रतिपादनम्), अवभृथेऽपूर्वकर्मताप्रतिपादनम् (गृहमेधीयव-दवभृथयागोऽपूर्व इति प्रतिपादनम्), वाजपेयादौ यूपादीनां खादिरत्वादि-नियमप्रतिपादनम्, काम्येष्टिषु प्राकृतद्रव्यदेवतानिवृत्तिप्रतिपादनम्, सोमापौष्णपशौ खादिरयूपस्य नियमप्रतिपादनम्, ब्रह्मवर्चसकामै व्रींहिभिरेव यागप्रतिपादनम्, पञ्चावदानतायाः सर्वाङ्गसाधारणताप्रतिपादनम्, प्रदेशानारभ्यविधानयोर्निषेधस्यपर्युदासताप्रतिपादनम् (बाधापयुक्तनञर्थ-विचारे नार्षेयं वृणीते न होतारमित्यत्र न विकल्पः किन्तु पर्युदास एवेति प्रतिपादनम्), निषेधस्यार्थवादताप्रतिपादनम् (न तौ पशौ करोति न सामे इति प्रतिषेधस्य दृष्टान्तवर्णनरूपार्थ-वादत्वप्रतिपादनम्, अतिरात्रे षोडशीग्रहनिषेधस्य विकल्परूपताप्रतिपादनम्, जर्तिलोक्तौ निषेधस्यार्थवादताप्रतिपादनम् (जर्तिलाःकृष्णतिला अरण्यतिला इति केचित्), त्रैयम्बकादावभिघारणानभिघारणादीनामर्थवादताप्रतिपादनम्, आधान उपवासस्य विकल्पताप्रतिपादनम्, दीक्षितो न ददातीत्यस्य पर्युदा-सताप्रतिपादनम्, वर्त्महोमादिभिराहवनीयस्य बाधप्रतिपादनम्, वैमृधादिषु साप्तदश्यविधे र्वाक्यविशेषताप्रतिपादनम् (वैमृधादावेव साप्तदश्यं नान्यासु विकृतिष्विति प्रतिपादनम्), अविहितस्वाहाकारेषु स्वाहाकार-विधान प्रतिपादनम् (सर्वस्मिन् दर्विहोमे स्वाहाकारविधानम्) अग्न्यति-ग्राह्यस्य विकृतावुपदेशप्रतिपादनम् (अतिग्राह्यनामका ग्रहा विकतावप्यति-

दिश्यन्त इति प्रतिपादनम्), उपस्तरणावभिधारणाभ्यां सहैव चतुरवदानस्यावश्यकताप्रतिपादनम् (पुरोडाशस्य न चतुरवदानमिति प्रतिपादनम्), उपांशुयाजेऽपि चतुरवत्तस्यावश्यकताप्रतिपादनम्, दर्शपूर्णमासयोराग्नेयैन्द्रयोरनुवादप्रतिपादनम्, (आग्नेय ऐन्द्राग्नश्चोभौ पुरोडाशौ दर्शपूर्णमासगत पुरोडाशाभ्यां न व्यतिरिक्ताविति प्रतिपादनम्), उपांशुयाजस्य ध्रौवाज्यद्रव्यताप्रतिपादनम् (ध्रुवाज्यमेवोपांशुयागे द्रव्यमिति प्रतिपादनम्), उपांशुयागस्य प्राकृतदेवतानियमप्रतिपादनम् (उपांशुयागे दर्शपूर्णमासतन्त्रपठिता एव काचिद्देवतेति प्रतिपादनम्), उपांशुयाजस्य विष्ण्वादिदेवताकत्वपौर्णमासीकर्तव्यत्वयोः प्रतिपादनम् (एकपुरोडाशायामप्युपांशुयाजप्रतिपादनम्) एकपुरोडाशाया याजप्रतिपादनम्, एकपुरोडाशायामपि भवत्युपांशुयाज इति प्रतिपादनम् ।

घ) प्रकरणे

आग्नेयादीनां समुदितानां तन्त्रेण स्वकर्मफलकत्वप्रतिपादनम् (दर्शपूर्णमासयो षण्णामाग्नेयादीनां यागानामेकमेवफलमिति प्रतिपादनम्), अङ्गानामेककार्यप्रतिपादनम्, दर्शपूर्णमासयोः प्रयाजादीनामङ्गार्थं संभूय प्रधानस्योपकारकर्तृत्वमिति प्रतिपादनम् (प्रधानकर्म सकलाङ्गयुक्तं कर्तव्यमिति च प्रतिपादनम्), काम्यकर्मणां भूयोऽभ्यासप्रतिपादनम् (फलोद्देश्येन क्रियमाणं फलाकाङ्क्षानुसारेण भूयोभूयः कुर्यादिति प्रतिपादनम्), अवघातादीनामातण्डुलनिर्वृत्तावभ्यासप्रतिपादनम्, प्रयाजादीनामङ्गानां सकृदनुष्ठानप्रतिपादनम्, बहुवचनस्य त्रित्वपरत्वे कपिञ्जलानालभेतेत्यत्र त्रयाणामेवालम्भ इति प्रतिपादनम्, उत्तरादोहयतीत्यत्र सर्वासां गवां दोहनप्रतिपादनम्, आघाराद्यङ्गानां तन्त्रेणानुष्ठानप्रतिपादनम्, कृष्णग्रीवयोः प्रथमतृतीययो र्भेदेन प्रदानप्रतिपादनम् (आग्नेययागः कृष्णग्रीवालम्भनरूपःपृथगनुष्ठानरूपो भवतीति प्रतिपादनम्), आग्नेयादीनां प्रधानानां तन्त्रप्रतिपादनम्, प्रधानानामेवाग्नेयादीनां सम्बन्धेन देशकालकर्त्रादीनां तन्त्रेण प्रतिप्रधानं सम्बन्ध इति प्रतिपादनम्, अङ्गेषु प्रयाजादिषु देशादिः (देशकालकर्तारः)

प्रधानदेशादिभ्यः पृथङ्नेति प्रतिपादनम्, दर्शपूर्णमासेष्टिप्रभृतिषु सङ्घभेदेनाङ्गानां भेदेनानुष्ठानप्रतिपादनम् (यागत्रयसमुदायरूपे दर्शे अपरयागसमुदायरूपे पूर्णमासे च अङ्गं प्रयाजादि अध्यसेत्, प्रतित्रिकमङ्गानां पृथगनुष्ठानं न तन्त्रेणेति प्रतिपादनम्), अध्वरकल्पानां त्रिषु सङ्घेषु अङ्गानां भेदेनानुष्ठानमिति प्रतिपादनम् (प्रातर्मध्यन्दिना-पराह्णवर्तिनां प्रधानानामङ्गान्यपि तत्रतत्रावर्तनीयानीति प्रतिपादनम्), प्राजापत्यवसाहोमानां तन्त्रेणानुष्ठानप्रतिपादनम् (यत्रानेकेषु कर्मसु देवता एकैव, तत्र वसाहोमस्तन्त्रेणानुष्ठीयते न तु प्रतिपशु अभ्यस्यत इति प्रतिपादनम्, एकादशिनगतवसाहोमस्य भेदेनानुष्ठानप्रतिपादनम्, यूपैकादशिन्यां तन्त्रेण यूपाहुत्यनुष्ठानप्रतिपादनम्, साङ्गस्यावभृथस्य अप्स्वनुष्ठानप्रतिपादनम्, वरुणप्रघासे आग्नेयादीनां मारुत्या भेदेनानुष्ठानप्रतिपादनम्, उत्तरदक्षिणविहारयोः कर्त्रभेदप्रतिपादनम्, उत्तरदक्षिणविहारयोः पत्नीसंयाजादीनां भेदेनानुष्ठानप्रतिपादनम्, वाजपेये प्राजापत्यपश्वालम्भशेषस्य ब्रह्मसमकाल उत्कर्षप्रतिपादनम्, अहीने उक्षाणामुत्सर्गस्य कर्मशेषप्रतिषेधार्थताप्रतिपादनम्, दशपेयाभिषेचनीययो र्भेदेन प्रयोगप्रतिपादनम्, वारुणीनिष्कासावभृथस्यार्थकर्मताप्रतिपादनम्, वेद्याद्यङ्गानां प्रधानकालान्यकालकर्तव्यताप्रतिपादनम्, आधानस्य तन्त्रेणानुष्ठानमिति प्रतिपादनम्, अग्नीषोमीयादियूपस्य तन्त्रेणानुष्ठानप्रतिपादनम्, यूपसंस्काराणां तन्त्रेणानुष्ठानप्रतिपादनम्, स्वरोस्तन्त्रेणानुष्ठानप्रतिपादनम्, अहर्गणे कृष्णविषाणप्रासनस्यान्त्याहनियमप्रतिपादनम्, राजसूये नानाबीजेषु वाग्विसर्गस्य चरमकालनियमप्रतिपादनम्, अग्नीषोमीये पौरोडाशिककाल एव वाग्विसर्गप्रतिपादनम्, अग्निचयनेऽभिविमोकस्य मतभेदेन व्यवस्थाप्रतिपादनम्, उपसत्कालस्य सुब्रह्मण्याह्वानस्य तन्त्रेणानुष्ठानप्रतिपादनम्, सुत्याकालीनसुब्रह्मण्याह्वानस्य भेदेनानुष्ठानम् इति प्रतिपादनम्, देशपात्रर्त्विजां मन्त्रप्रयोगे पूर्वदेशाद्यादानस्यैच्छिकताप्रतिपादनम्, पात्राणां तन्त्रस्य नियमप्रतिपादनम् (यज्ञियानां पात्राणामामरणं यत्नेन रक्षणमिति प्रतिपादनम्), तेषां पात्राणां धारण-

मग्न्याधानत इति प्रतिपादनञ्च, सर्वसोमानामुपरिष्टात् प्राजापत्यप्रयाज-प्रतिपादनम्, सवनीयपुरोडाशे देवतोत्कर्षप्रतिपादनम्, (सूक्तवाके उत्कृष्टे सति पौरोडाशिकदेवतावाचिशब्दा उत्कृष्येरन्निति प्रतिपादनम्), राजसूये सौमापौष्णादिकेऽङ्गानां भेदेनानुष्ठानप्रतिपादनम्, दक्षिणाभेदे तन्त्राणाम् (अङ्गानाम्) भेद इति प्रतिपादनम्, राजसूये कर्तुस्तन्त्रता-प्रतिपादननम्, राजसूये ऋत्विजां वृतानां भेदो नेति प्रतिपादनम्, अवेष्टावङ्गानां भेदप्रतिपादनम्, अवेष्टौ यागे प्रयोगेऽनुष्ठाने च तन्त्रत्र किन्तु भेद इति प्रतिपादनम्, पवमानेष्टिहविषां भेदेनानुष्ठानप्रतिपादनम्, द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकस्य द्वादशाहताप्रतिपादनम् (द्वादशाहे दीक्षो-पसदित्यादेः स्वस्थाने एव वृद्धिः द्वादशदीक्षा द्वादश उपसद इत्येवं क्रमेणैव प्राकृतसंख्यावृद्धिप्रतिपादनम्), प्रधानैरपृथक्कालानामङ्गानां भेदेनानुष्ठानप्रतिपादनम्, (दीक्षादीन्यन्यस्मिन् कालेऽनुष्ठेयानि, सुत्यानि तु प्रधानसमकालानि तस्माद् भेदेनानुष्ठानमिति प्रतिपादनम्), उपसत्काले सुब्रह्मण्याह्वानस्याविकारेण कर्तव्यताप्रतिपादनम्, सुब्रह्मण्याह्वाने सुत्याहानां भेदेनानुष्ठानं न भवतीति प्रतिपादनम्, वाजपेये प्राजापत्येषु कुम्भ्यादीनां तन्त्रताप्रतिपादनम् (अनेकपशूनां समीपे कुम्भी एकैव तस्याः तन्त्रतेति प्रतिपादनम्), भिन्नदेवताकेष्वपि शूलादीनां तन्त्रता-प्रतिपादनम्, भिन्नजातिषु कुम्भ्यादीनां भेदेनानुष्ठानप्रतिपादनम्, अश्वपति-ग्रहेष्टौप्रतिपुरोडाशं कपालभेदप्रतिपादनम्, व्रीह्यवहननादौ प्रतिप्रहारं मन्त्रस्यानावृत्तिप्रतिपादनम्, नानाबीजेष्टौ प्रतिप्रहारं मन्त्रावृत्तिप्रतिपादनम्, कण्डूयनमन्त्रस्यानावृत्तिप्रतिपादनम्, स्वप्नादिमन्त्रानावृत्तिप्रतिपादनम्, दीक्षितस्य प्रयाणे मन्त्रानावृत्तिप्रतिपादनम्, उपरवमन्त्रस्यावृत्ति-प्रतिपादनम्, हविष्कृदादिमन्त्राणामावृत्तिप्रतिपादनम्।

ङ) प्रकरणे

अग्नीषोमीयप्रयाजादिभिः पुरोडास्योपकारप्रतिपादनम्, पुरोडाशे आज्यभागयोः कर्तव्यताप्रतिपादनम् (पशुपुरोडाशआज्यभागकर्तव्यता-प्रतिपादनम्), सोमे दार्शिकवेद्यकरणप्रतिपादनम् (सोमयागे दर्शपूर्ण-

मासाद्यर्थं पृथग्वेदिः न कार्येति प्रतिपादनम्), सौम्यचर्वादिहोमस्यैष्टिक-पात्रैरनुष्ठानप्रतिपादनम्, शामित्रे पशुपुरोडाशश्रपणाभावप्रतिपादनम्, कौण्डपायिनामयनेऽग्निहोत्रद्रव्यस्य प्राजाहिते श्रपणप्रतिपादनम्, हविर्धानशकटान्यशकटेनौषधजनकपुरोडाशनिर्वापप्रतिपादनम् (प्रायणीयादिषु दीक्षाजागरस्याभावप्रतिपादनम्), विहारभेदेन मन्त्रभेद-प्रतिपादनम्, दीक्षणीयाष्वग्न्यन्वाधानस्याभावप्रतिपादनम्, दीक्षणीयादिषु व्रतोपायनाभावप्रतिपादनम्, ऐष्टिकेष्वग्न्याधानानुष्ठानप्रतिपादनम्, ऐष्टिकेषु पत्नीसंनहनाननुष्ठानप्रतिपादनम् (सोमाङ्गेष्टौ पत्न्याः सन्नाहो नेति प्रतिपादनम्), ऐष्टिकेषु आरण्यभोजनाभावप्रतिपादनम्, ऐष्टिकेषु शेषभक्षस्य संस्कारार्थतया कर्तव्यत्वप्रतिपादनम्, ऐष्टिकेषु होतुर्वरण-सद्भावप्रतिपादनम्, आतिथ्यायां बर्हिषः प्रतिकर्मप्रोक्षणाभावप्रतिपादनम्, आतिथ्यायां स्तरणमन्त्रावृत्तिप्रतिपादनम्, बर्हिषो देशान्तरनयने संहनन-हरणमन्त्रयोरप्रयोगप्रतिपादनम्, तन्त्रिनिर्णयः विहाराग्नेर्वैदिककर्म मात्रार्थताप्रतिपादनम्। गार्हपत्यदक्षिणाहवनीयरूपविहारशब्दवाच्येऽग्नौ वैदिकमेव कर्म कर्तव्यमिति प्रतिपादनम्, सवनीयपशौ पशुपुरोडाशस्य कर्तव्यताप्रतिपादनम्, सवनीयपुरोडाशे हविष्कृदाह्वानस्याभावप्रतिपादनम्, तृतीयसवने हविष्कृदाह्वानस्य न पुनरावृत्तिरिति प्रतिपादनम्, निशि यज्ञे अमावस्यातन्त्रप्रयोगप्रतिपादनम्, निशियागे दर्शयागस्येतिकर्तव्यता प्रसङ्गेन वर्तत इति प्रतिपादनम्, विकृतिषु आरम्भणीयानुष्ठानप्रतिपादनम्, दर्शपूर्ण-मासयोः प्रथमप्रयोगे कर्तव्या आरम्भणीया सौर्यादिविकृतिष्वपि कर्तव्येति प्रतिपादनम्, प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानप्रतिपादनम्, बहूनां प्रधानानां विरुद्धधर्माणां प्रसक्तौ सत्याम् (बहूनामनुगुणो यो धर्मः स ग्राह्य इति प्रतिपादनम्), तुल्यसंख्याकानां धर्मविरोधे प्रथमस्यैव-धर्मानुष्ठानप्रतिपादनम्, अङ्गगुणविरोधे प्रधानगुणस्यैव प्राबल्यप्रतिपादनम्, परिधौ परिधियूपोभयधर्मानुष्ठानप्रतिपादनम्, परिधौ विरोधियूपधर्मान-नुष्ठानप्रतिपादनम्, सवनीयपुरोडाशयोः पशोरेवतन्त्रिताप्रतिपादनम्,

सवनीयपशौ पशोरेव प्रयोगः पशुरेवात्रतन्त्री पुरोडाशस्तु तन्मध्यपाती प्रासङ्ग्येवेति प्रतिपादनम्, समानतन्त्रप्रकृतिविकृत्योर्विकृतित- न्त्रानुष्ठान-प्रतिपादनम्, यदा नित्यकाम्ययोः प्रकृतिविकृत्योरनुष्ठानसहभावस्तदा वैकृतमेवानुष्ठेयमिति प्रतिपादनम्, आग्रायणे प्रसूनबर्हिषामेव ग्रहण-प्रतिपादनम्, द्यावापृथिव्यादीनां सर्वेषामेव तन्त्रित्वप्रतिपादनम्, समुच्चयतदपवादभूतविकल्पविचारः, अष्टरात्रे वत्सत्वगहतवाससोः समुच्चयप्रतिपादनम्, अनुनिर्वाप्यपुरोडाशानां पुरोडाशस्यैव तन्त्रत्व-प्रतिपादनम्, अनुनिर्वाप्याणामष्टहविषां तन्त्रं पुरोडाशे न निविशते, पुरोडाशे स्वकीया धर्मा अनुष्ठीयन्त इति प्रतिपादनम्, भिन्नोपकाराणां गुणानां समुच्चयप्रतिपादनम्, प्रयोजनैक्ये गुणानां विकल्पप्रतिपादनम्, वैगुण्यसमाधानार्थानां प्रायश्चित्तानां विकल्पप्रतिपादनम्, प्रायश्चित्तानैकत्वे विकल्पप्रतिपादनम्, नैमित्तिकप्रायश्चित्तानां समुच्चयप्रतिपादनम्, कर्मकाले अनध्यायेऽपि मन्त्राणां प्रयोगप्रतिपादनम्, कर्मणि प्रवचनस्वरेणैव मन्त्रोच्चारणप्रतिपादनम्, ब्राह्मणोत्पन्नमन्त्रस्य भाषिकस्वरेणैवोच्चारणमिति प्रतिपादनम्, भाषिकस्वरः तत्तच्छाखीय ब्राह्मणस्वरः, मन्त्राणां पठना-नन्तरमेव पदार्थानुष्ठानप्रतिपादनम्, वसोर्धारायां मन्त्रान्ते कर्मसन्निपात-प्रतिपादनम्, आघारेऽपि मन्त्रान्ते कर्मसन्निपातप्रतिपादनम्, एककार्य-मन्त्राणां विकल्पप्रतिपादनम्, संख्याविहितमन्त्राणां सम्मुच्चयप्रतिपादनम्, ब्राह्मणविहितमन्त्राणां विकल्पप्रतिपादनम्, हौत्राणां मन्त्राणां समुच्चय-प्रतिपादनम्, विकल्पतदपवादसमुच्चयविचारः, जपस्तुत्याशीरभि-धानानां समुच्चयप्रतिपादनम्, सोमक्रयसाधनानामजादीनां समुच्चय-प्रतिपादनम्, अयजनादिप्रतिपत्तिकर्मणां समुच्चयप्रतिपादनम्, आधाने विविधसंख्याकानां दक्षिणानां विकल्पप्रतिपादनम्, पशुगणेषु जाघनीनां विकल्पप्रतिपादनम् (जाघनीशब्दः पुच्छवाची) उखायां काम्येन नित्याग्ने-र्विकारप्रतिपादनम्, काम्येन नित्यस्य निवृत्तिः, वृक्षादाहृतोऽग्नि हखायां धृतमग्निं बाधत इति प्रतिपादनम्, वैकारिकाग्नेराहवनीयत्वाभाव-

प्रतिपादनम्, वैकारिकाग्नेराधानिकसंस्काराभावप्रतिपादनम्, नित्यस्योख्य-स्याग्नेरधारणप्रतिपादनम्, सत्रे शुक्रस्पर्शादीनामेककर्तृकत्वप्रतिपादनम् (सत्रादौ बहुकर्तृके कर्मणि क्रतुगतग्रहादिसंस्कारार्थं याजमानं कर्म तदेकेनैव यजमानेन कर्तव्यं न सर्वैरिति प्रतिपादनम्, अहीने शुक्रस्य स्पर्शादौ यस्यकस्यचिद् यजमानस्य कर्तृत्वप्रतिपादनम्, सत्रे शुक्रस्पर्शादौ गृहपतेरेव कर्तृत्वप्रतिपादनम्, सत्रेऽञ्जनादिसंस्काराणां सर्वगामित्व-प्रतिपादनम्, यजमानर्त्विज्ययोरार्त्विज्यस्यैव बलवत्त्वप्रतिपादनम्, ब्राह्मणस्यैवार्त्विज्याधिकारप्रतिपादनम् ।

पाठ्यग्रन्थः

१. शास्त्रदीपिका (शास्त्रदीपिकाया दशमैकादशद्वादशाध्यायाः)

सन्दर्भग्रन्थाः

१. मीमांसामयूख – प्रा. चूडानाथभट्टराय ।
२. मीमांसासूत्रस्य शाबरभाष्यम्- (दशमैकादशद्वादशाध्यायाः) ।
३. अध्वरमीमांसाकुतूहलवृत्तेर्दशमैकादशद्वादशाध्यायाः ।
४. तन्त्ररत्नस्य पार्थसारथिमिश्ररचितस्य दशमैकादशद्वादशाध्यायाः।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि		प्रश्नप्रकाराः	प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
यववराहवेतसशब्दाः प्रियङ्गुवायसजम्बूषु देशान्तरे प्रयुज्यन्ते तत्र संशयोत्पादनं तन्निवारणञ्च वार्तिकमनुसृत्य विवेचनम्, आर्यम्लेच्छप्रयोगविप्रतिपत्तिबलाबलचिन्तनम्, स्मृत्याचारविरोधे बलाबलचिन्तनम्, लोकवाक्यशेषयोर्विरोधे बलाबलविचारः, त्रिविदग्निष्टोमः **'त्रिवृता ग्रन्थिनैकेन'** इति श्रुतिस्मृत्योः प्रवृत्तस्य त्रिविच्छब्दस्य विचारः, य आर्यावर्तनिवासीनां प्रसिद्धाः शब्दास्तेषां म्लेच्छप्रसिद्धोऽर्थो ग्राह्यो न वेति विचारः, कल्पसूत्राणां वेदत्वं भवति न वेति विचार्य कल्पसूत्राणां स्मृतितुल्यतासम्बन्धेऽपि विचारः, वेदाङ्गानां वेदशब्दवाच्यत्वं भवति न वेति विचारः। शाक्यजैनागमादयो धर्मे प्रमाणं भवन्ति न वेति विचारः, शाक्यादिभाषितानां न शास्त्रतेति प्रतिपादनम्, कल्पसूत्राणां स्वतन्त्रतायाः प्रत्याख्यानम्, कल्पसूत्राणां वार्तिकानुसारं प्रामाण्यविवेचनम्, प्राच्य-प्रतीच्यदाक्षिणात्योदीच्यानामाचारविचारः, नामपदं व्यक्तिमाकृतिं वा प्रतिपादयतीति विचारः, गौतमवसिष्ठशङ्खलिखितहारितापस्तम्बबौधायनादिप्रणीतधर्मशास्त्राणां व्यवस्थितं प्रामाण्यमथवा सर्वदेशगतमिति विचारः, **सम्बन्धैर्बहुभिर्देशसमाख्या हि प्रवर्तते । निवासभवजातत्वतदागमनहेतुभिरित्यत्र** विचारः, साधुभिरेव भाषितव्यमुता साधुभिर्भाषितव्यमेवेति कीदृशो नियमः कल्पनीय इत्यत्रविचारः, वेद एव व्याकरणनित्यत्वं दृश्यत इत्यत्र विचारः, व्याकरणस्याध्ययनं किमर्थमिति विचारः, तत्वावबोधो वाक्यानां नास्ति व्याकरणादृतेरित्यत्र विचारः, **व्याख्यानतो विशेष प्रतिपत्तिर्न हि सन्देहादलक्षणमित्यत्र** विचारः, **चत्वारिवाक्परिमितापदानीत्यत्र** विचारः,

व्याकरणोत्पन्नैः शब्दैर्वेदोऽपि निर्मितोऽतोव्याकरणस्येव वेदस्याप्यप्रमाणतेति तत्र विचारः, साध्वसाधुताविचारः, अन्यायश्चानेकशब्दत्वमिति विचारः, साधुत्वज्ञानं सिद्धमेवेति विचारः, शास्त्रशब्दः कर्मार्थं प्रतिपादयतीति विचारः, स्मृतिशब्दविचारः स्मृतीनां प्रमाणत्वविचारश्च, व्याकरणस्य स्मृतित्व-प्रतिपादनम् ।

घ) **प्रकरणे**

लोकवेदयोः शब्दार्थानन्यत्वचित्राद्यधिकरणनिरूपणम्-

लोकवेदयोः शब्दार्थानामन्यत्वमनन्यत्वं वेति विचारो विचारस्य प्रयोजनञ्च, लौकिकवैदिकशब्दार्थैकत्व आकृत्यधिकरणमारब्धव्यं न वेति विचारः, शब्दार्थैकत्वमिति वक्तव्येऽर्थैकत्ववचनं किमर्थमिति विचारः, उत्ताना वै देवगवावहन्तीत्यत्र विचारः, आकृतिशब्दार्थोऽथ-व्यक्तिरित्यत्र विचारः, व्यक्तिविशेषयोर्भेदविचारः, अस्ति क्षीरा गौरित्या-दावस्तिशब्दार्थविचारः, गोशब्दो व्यक्तिं वदति गोजातिं वेति विचारः, **'आकृतिर्यदि शब्दार्थः कस्य स्युः प्रोक्षणादयः'** इत्यत्र विचारः, श्येनचितं चिन्वीतेत्यत्रविचारः, व्यक्तिपक्षे कः संशय इति विचारः, व्यक्तिविशिष्टायामाकृतौ किमिति न वर्तत इत्यत्र विचारः, शब्दस्याकृत्यर्थ-त्वात् कथं व्यक्तेर्बोध इति विचारः, उद्भिदादयो गुणस्य प्रमाणमुत क्रियाणामेव नामधेयेनेत्यत्र विचारः, **आज्यैः स्तुवते, पृष्ठैः** स्तुवत इत्यादिवाक्यविचारः, गुणविधिनामधेययोर्विचारः, गुणविधिः फले यागे वा नामधेये वेति विचारः, काम्यता कस्येति विचारः, यदाजिमीयुस्तदा-ज्यानामाज्यत्वमित्यत्र विचारः ।

ङ) **प्रकरणे**

तत्प्रख्यादिसामर्थ्याधिकरणनिरूपणम् -

अग्निहोत्राघारशब्दव्युत्पत्तिः, अग्निहोत्राघारशब्दयोर्विचारः, श्रुत्यैव गुणो विधीयत इत्यत्र विचारः, तन्त्रं कतिधा भवतीति विवेचनम्, तन्त्रवार्तिकानुसारमाग्नेयाधिकरणविचारः, तन्त्रवार्तिकानुसारं बर्हिराज्या-धिकरणविचारः, तन्त्रवार्तिकानुसारं प्रोक्षण्यधिकरणविचारः, तन्त्रवार्ति-कानुसारं निर्मन्थ्याधिकरणविचारः, तन्त्रवार्तिकानुसारं वैश्वदेवाधिकरण-

विचारः, उत्पत्तिशिष्टोत्पन्नशिष्टविचारः, केवलगुणविधित्वमस्ति न वेति विचारः, वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात इत्यत्र तन्त्रवार्ति-कानुसारं विचारः, गौणवृत्तीनां लक्षणविचारः, 'अजहत्स्वार्थाः सर्वाः शब्दप्रवृत्तयः' इत्यत्र विचारः, गौणमुख्यविभागः कथं भवतीति विचारः, स्वार्थाभिधानैव गौणत्वमित्यस्य स्थापनम्, तन्त्रवार्तिकानुसारं वाक्यशेष-सामर्थ्याधिकरणनिरूपणम् ।

पाठ्यग्रन्थः

१. **तन्त्रवार्तिकम्** – प्रथमाध्यायमात्रम्, कुमारिलभट्टविरचितम्।

सहायकग्रन्थाः

१. **शाबरभाष्यम्** – प्रथमाध्यायस्य द्वितीयपादतः प्रथमाध्याय-समाप्तिपर्यन्तम् ।

२. **अध्वरमीमांसाकुतूहलवृत्तिः** – प्रथमाध्यायस्य द्वितीय-तृतीय-चतुर्थपादयुता ।

३. **मीमांसानयमञ्जरी** – १-२ भागयुता, पट्टाभिरामशास्त्रिरचिता।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकौ	२	१	२०
		तुलनात्मकौ	२	१	२०
		व्याख्यात्मकौ	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - अष्टमम्

पाठ्यांशनाम - वेदाध्ययनप्रयुक्तविधिभावनाविभक्तिविज्ञानम्

पाठ्यांशगतोद्देश्यम्

१. विचारशास्त्रापरपर्यायं वाक्यशास्त्रमध्ययनविधिप्रयुक्तमिति विचारावबोधनम् ।
२. अनादिलोकप्रसिद्धन्यायावलम्बनेन श्रौतस्मार्तकर्मप्रयोगाणामुपयोगविधिविज्ञानम् ।
३. वेदाध्ययनाध्यापनयोर्विधिप्रयुक्तत्वमिति विचारविश्लेषणम् ।
४. वेदवाक्यार्थनिर्णयात्मकाध्ययनशास्त्रस्यारम्भणीयत्वहेतुत्वावबोधनम् ।
५. ज्ञानानां प्रामाण्यविश्लेषणम्, कार्यताज्ञानस्य प्रवृत्तिहेतुत्वप्रतिपादनञ्च ।
६. विहितक्रियात्वम्, निषिद्धक्रियात्वम्, धर्मत्वमधर्मत्वमिति विवेचनज्ञानम् ।
७. यागगतश्रेयस्साधनत्वस्य वेदबोध्यत्वम्, लिङ्विधिभावनाविभक्तिविश्लेषणार्थकबोधनञ्चेति ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	अध्ययनविधिस्वतःप्रामाण्यविचारः	३६	२०
ख	व्याप्तिस्वरूपमानसप्रत्यक्षाभिहितान्वया-न्विताभिधानविचारः	३६	२०
ग	नित्यकाम्यविवेकविचारः	३६	२०
घ	धर्मप्रमाणविधिभावनाविचारः	३६	२०
ङ	आख्यातधात्वर्थद्वितीयाविभक्तिविचारः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

अध्ययनविधिस्वतःप्रामाण्यविचारः -

आचार्यकरणविधिप्रयुक्तस्य स्वाध्यायाध्ययनस्य प्रयोजनं स्वाध्यायसिद्धिरिति प्रभाकरमतेन पूर्वपक्षोऽर्थज्ञानरूपं प्रयोजनमित्युत्तरपक्षस्य च विवेचनम्, शास्त्रमारब्धमिति प्रभाकरसिद्धान्तोपपादनं तन्निरासश्च, भट्टमतेनाध्ययनविधेरर्थज्ञानं नास्तीति पूर्वपक्षोपपादनं तन्निरासश्च, अध्ययनविधिरेवविचारस्याऽपि प्रयोजकः, इति पक्षोपपादनं विवेचनञ्च, अध्ययनविधिरधिकारपर्यवसायी विधित्वादग्निहोत्रादिविधिवदितिपक्षस्य विवेचनम्, अध्यापनविधिः कः कथं च तेनाध्ययनं प्रयुज्यत इति विवेचनं तन्निराकरणञ्च, व्याकरणस्मृत्या तत्र विशेषविवेचनम्, अध्ययनस्य स्वाधिकारेणैव प्रयुक्तिः संभवतीति पक्षस्योपपादनपूर्वकं निरसनम्, स्वाध्यायोऽध्येतव्यः, इति विधिप्रयुक्तभावनाया भाव्यं किमिति विचारस्य प्रसङ्गे तत्रनियमविध्याशङ्कातन्निरासश्च, भाट्टमतानुसारं 'स्वाध्यायोऽध्येतव्यः' इति विधेर्दृष्टं फलं विविच्य तस्य नियमार्थत्वप्रतिपादनम्, हुंफडित्यादीनामध्ययनमर्थज्ञानार्थत्वाभावात् तादृशवाक्यानामध्ययनं किमर्थमिति विचारः, अध्ययनस्य नानाप्रयोजनत्वे वैरूप्याशङ्कायाः निरसनम्, '**स्वतः सर्वप्रमाणानां प्रामाण्यम्**' इति वाक्यस्य विवेचनम्, तत्र पूर्वपक्षस्तन्निरासश्च, प्रामाण्यमर्थतथात्वरूपं न तु ज्ञानधर्ममिति विवेचनम्, अर्थतथात्वरूपं प्रामाण्यमित्यस्य विवेचनमधिगतार्थगन्तृत्वरूपं प्रामाण्यमित्यस्य विवेचनम्, ज्ञानमव्यभिचारमुखेनैवार्थं निश्चाययतीति न किन्तु स्वत एव नेत्यत्रविचारः, गुणस्य प्रामाण्यप्रयोजकत्वप्रतिपादनम्, नियोगो विधिरित्यस्य विवेचनम्, तत्र लिङादीनां व्युत्पत्तिप्रदर्शनञ्च, नियोगो विधिरिति पक्षस्य खण्डनम्, कृत्युद्देशार्हता कार्यतेत्यस्य विवेचनञ्च, कृत्यर्हता कार्यतेत्यस्य विवेचनम्, तत्र दोषप्रदर्शनञ्च, सुखसाधनत्वं कार्यत्वमित्यस्य विवेचनमपूर्वस्य कार्यत्वं नोपपद्यत इति विवेचनञ्च, समीहितसाधनत्वमेव भावनाया लिङादिभिरभिधीयत इति मतोत्थापनं विवेचनञ्च, तस्मात् कृत्यर्हता-

विधिश्च भिन्नावर्थावित्यस्य विवेचनम्, अभिधाभावनेत्यस्य विवेचनम्। ज्ञानसंस्कारयोः शब्दव्यापारत्वं नोपपन्नमित्यस्य विवेचनञ्च, परसमवेत-क्रियाफलशालित्वं कर्मत्वमित्यस्य प्रतिपादनम्, लिङादयोऽभिधा-व्यापारमेव प्रवर्तनारूपेण कथयन्तीत्यस्य विवेचनम्, इष्टसाधनत्व-मेव विध्यर्थः, इत्यस्य विवेचनम्, अभिधाभावनामाहुरिति वार्तिकस्वा-रस्यप्रतिपादनम्, समीहितसाधनत्वमेव लिङादिभिरभिधीयत इति निष्कर्षस्य विवेचनम् ।

ख) प्रकरणे

व्याप्तिस्वरूपमानसप्रत्यक्षाभिहितान्वयान्विताभिधान-विचारः-

व्याप्तिस्वरूपे पूर्वपक्षोत्थापननिराकरणपूर्वकं नियम एव व्याप्ति-शब्देनोच्यत इत्यस्य प्रतिपादनम्, नियमो व्याप्तिरित्यत्र धर्मकीर्तेर्विप्रति-पत्तिस्तन्निरासश्च, शब्दो गुणः, इति मतस्य विवेचनपूर्वकं निराकरणम्, बहिरिन्द्रियविषय एव नियम इति मतस्य विवेचनपूर्वकं निराकरणम्, वर्तमानविषयं प्रत्यक्षम्, देहस्य कालान्तरसम्बन्धात्मा नियमः प्रत्यक्षेण कथमवगम्यत इत्याशङ्काया विवेचनं तन्निरासश्च, स्वाभाविकसम्बन्धो नियम इति पक्षस्य विवेचनपूर्वकं निराकरणम्, अर्थापत्तिप्रमाणगम्यो नियम इति पक्षस्य विवेचनपूर्वकं निराकरणं भूयो दर्शनगम्यरूपनियमो व्याप्तिरित्यस्य प्रतिपादनं भूयो दर्शनस्य विवेचनञ्च, नियमस्य भूयो दर्शनगम्यत्वप्रतिपादनम्, भूयो दर्शनतोऽवगतो यत्र धूमस्तत्राग्निरित्य-वगमः कस्मिन् प्रमाणेऽन्तर्भवतीत्यस्य प्रतिपादनम्, मीमांसकाभिमतानु-मानस्वरूपेणावयवसन्निवेशविशिष्टतया तनुतरुमहीधरादीनां कश्चित् कर्ताऽस्तीत्यनुमानस्य निरसनम्, सामान्यमेवानुमीयते न विशेष इत्यस्य विवेचनम्, वाक्यार्थविचारे पूर्वपक्षविवेचनपूर्वकं पदैरभिहिताः पदार्था एव वाक्यार्थं प्रतिपादयन्तीति सिद्धान्तस्य विवेचनम्, निरवयवमेव पदं पदार्थस्य वाचकं तथा वाक्यमपीत्यस्य विवेचनं तन्निरासश्च, संहितानां वर्णानामेवाभिधायकत्वमिति सिद्धान्तसमर्थनञ्च, संहितानां वर्णानाम-भिधायकत्वे क्रमवर्तिनां साहित्यं कथमिति शङ्काया विवेचनपूर्वकं तत्र

युक्तिप्रदर्शनम्, वर्णातिरिक्तमनवयवं पदं नास्ति वाक्यमप्यनवयवं न सिद्ध्यतीत्यस्य विवेचनम्, वाक्याद् वाक्यार्थप्रतिपत्तौ पदपदार्थ-व्युत्पत्तिरङ्गमिति मतस्य विवेचनपूर्वकं निरसनम्, पदार्था एव परस्परा-न्विता वाक्यार्था इत्युच्यन्त इति पक्षस्य विवेचनम्, अन्विताभिधान-मनुपपन्नं गौरवादेवेत्यस्य विवेचनम्, अन्विताभिधायित्वे दोषप्रदर्शन-पूर्वकमभिहितान्वयवादस्थापनम्, वाक्यार्थबोध एकवाक्यताया नियाम-कत्वं तेन शब्दस्य प्रमाणान्तरसिद्धिकथनञ्च, एकवाक्यताया नियामकत्व-मित्यत्र साधकबाधकोपन्यासः, एकवाक्यताया अन्वयनियामकत्वे शाब्दिकानां समर्थनप्रदर्शनम्, पदार्था एव वाक्यार्थे प्रमाणमित्यङ्गीकर्तुं युक्तमिति प्रतिपादनम्, पदार्थनिमित्तक एव वाक्यार्थो न पदनिमित्त इति विवेचनम्, पदार्थप्रतीतेरेव वाक्यार्थप्रमाणत्वे पदानां वाचकत्वं न स्यात् तेषां स्मारकत्वेनापि पदार्थं प्रति व्युत्पत्तेरिति शङ्काया निरासः, अभिधान एवान्वितप्रतीतिरित्यस्य विवेचनम्, सिद्धार्थेषु वाक्यार्थज्ञानं न पदनिमित्तकं किन्त्वनुमाननिमित्तकमित्याशङ्काया विवेचनं खण्डनञ्च, **'पदार्थविषयं वाक्यं तेनासावनुमीयते, नान्यस्तेनान्विते सिध्येत्प-दानां शक्तिनिर्णयः'** इत्याशङ्काया विवेचनं तन्निरासश्च, पदानां न वाचकत्वं किन्तु स्वार्थस्मारकत्वमेव ततोऽन्वितप्रतीतिः केवलानुमानादेव सिद्ध्यतीत्याशङ्काया विवेचनं निरसनञ्च, पदानां वाचकत्वशक्तिः पश्चादनुमानेऽपि न हीयत इत्याशङ्काया विवेचनं तन्निरासश्च, अन्विताभिधाने दोषाः, अभिहितान्वये च तदभावः, इति प्रतिपादनम्, अन्विताभिधान-वादस्य निरासे हेतुद्वयप्रदर्शनम्, अभिहितान्वयवादे उक्तदोषाभावश्च, शक्तिकल्पनाविषये गौरवप्रदर्शनम्, अभिहितान्वयवादस्य तद्दोषाभाव इति प्रतिपादनम्, अभिहितान्वयवादे सूत्रभाष्यानुगुण्यप्रदर्शनम्, व्यक्तौ न शब्दस्य शक्तिः किन्तु जातावेव इति कथनस्य निराकरणम्, वाक्यार्थो लाक्षणिकः, इत्यस्य विवेचनम् ।

ग) प्रकरणे

नित्यकाम्यविवेकविचारः -

नित्यकाम्ययोर्वैषम्यं नास्तीति प्रदर्शनं तत्र पूर्वपक्षोपस्थापनञ्च,

प्रभाकरमतेन काम्येऽङ्गसाकल्यं नित्ये विपर्यय इत्यस्य विवेचनम्, काम्यान्नित्यस्य वैलक्षण्यञ्च, काम्यनित्ययोर्वैलक्षण्यप्रदर्शने प्रभाकरमतमनूद्य तन्निरासः, काम्यनित्ययोर्वैलक्षण्ये शालिकनाथस्योपपत्तिप्रदर्शनं तन्निरासश्च, अग्नीषोमीयहिंसाया विधेयत्वाभावान्निषेधगोचरोऽनर्थः स्यादित्यत्र विचारः, अग्नीषोमीयहिंसाया विधेयत्वाभावेऽपि निषिद्धत्वं नास्तीति मतस्य विवेचनपूर्वकं खण्डनम्, सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यत इत्याशङ्काया विवेचनम्, नित्यं यथाशक्तिः, काम्यं च निखिलाङ्गसमन्वितं कार्यमित्यस्य विवेचनम्, नित्ये काम्ये च निखिलाङ्गोपसंहारः, इत्यस्य खण्डनञ्च, आवश्यकानां पापक्षयफलमुच्यते तत् फलानामावश्यकत्वमनयोः को विशेषः, इति विवेचनम्, शक्तिरधिकारिविशेषणं न वेति विवेचनम्, काम्ये निखिलाङ्गयुक्तस्यैव प्रयोगो नित्येत्वन्येषामङ्गानां यथाशक्त्युपसंहारः, इति सिद्धः काम्यनित्यविशेषः, इत्यस्य विवेचनम्, निमित्तशब्दः कारणपर्यायः कारणान्यवश्यं कार्यवन्ति न सहकारित्वापेक्षया कार्यविलम्बदर्शनादित्याशङ्काया निरासः, निमित्तनैमित्तिकयोर्विचारे नैमित्तिकस्यानुष्ठानं न भवतीत्यनुपपत्तिप्रदर्शनम्, नैमित्तिके निमित्तफलयोः सम्बन्धे वाक्यभेदशङ्का तस्य परिहारश्च, नित्यकाम्यविवेके नित्यशब्दस्यार्थविचारस्तत्र च कुमारिलप्रभाकरयोर्मतप्रदर्शनञ्च, काम्यविचारे प्रभाकरकुमारिलमतप्रदर्शनपूर्वकं कस्य सिद्धान्तो युक्ततर इति विवेचनम्,

घ) प्रकरणे

धर्मप्रमाणविधिभावनाविचारः -

धर्माधर्मलक्षणपूर्वपक्षस्तन्निरासश्च, धर्माधर्मयोर्लक्षणम्, श्येनयागस्य धर्मत्वं न वेति विचारश्च, बलवदनिष्टाननुबन्धित्वस्य धर्मलक्षणे प्रवेशो भवति न वेति विचारः, धर्माधर्मशब्दयोर्निकृष्टार्थोपस्थापनम्, 'यजेत' इत्यादौ करणत्वबोधकशब्दाभावत् यागगतश्रेयस्साधनत्वस्य वेदबोधकत्वं कथमिति विचारः, 'लिङर्थः कः' इत्यत्र तार्किकाणामभिप्रायः, लिङर्थानामन्वयोपपादनञ्च, तार्किकाभिमतलिङर्थनिराकरणम्, मीमांसकमते लाघवप्रदर्शनम्, बलवदनिष्टाननुबन्धित्वस्वरूपविचारः, बलवदनिष्टाननुबन्धित्वस्य विध्यर्थास्वीकारे-

ऽनिष्टोपपत्तिस्तन्निरासश्च, कृतिसाध्यत्वस्य लिङर्थत्वस्य निराकरणम्, इष्टसाधनत्वस्य लिङर्थत्वनिराकरणञ्च, लिङादिपदशक्यतावच्छेदकविचारः, इष्टसाधनत्वस्य विध्यर्थत्वेऽतिप्रसक्तिप्रदर्शनम्, लिङर्थप्रेरणावादेऽतिप्रसक्तिनिरूपणम्, तत्खण्डनञ्च, प्रेरणावादे प्रयोज्यप्रवृत्तिवर्तमानतादशायां पचेदिति प्रयोगापत्तिशङ्कानिवारणञ्च, प्रेरणावाद एव पाणिनिसम्मतः, इति प्रतिपादनम्, विविधविध्यर्थानां विवरणञ्च, लिङर्थे मण्डनपार्थसारथिमतञ्च, व्यापारो लिङ्वाच्यः, इत्यत्र विचारस्तस्य लाभश्च कथमिति प्रतिपादनं च, प्रेरणातिरिक्तानां लिङर्थानां कथमन्वय इति प्रतिपादनञ्च, नित्यकर्मविधौ लिङर्थविचारः, वैदिकलिङ्स्थले कथमनुमितिरिति विचारः, इच्छांसाधारणीविषयिता शब्दधर्म इत्यत्र विचारः, निषेधवाक्येषु लिङ्र्थस्वरूपम्, नञ्समभिव्याहृतलिङ्र्थविषयकशाब्दबोधविचारः, विहितनिषेधवाक्येषु शाब्दबोधविचारः, नञर्थस्य कुत्रान्वय इति विचारः, शाब्दीभावनाया अंशत्रयनिरूपणम्, अर्थवादप्रतिपाद्यप्राशस्त्याप्राशस्त्यस्वरूपविचारः, प्राशस्त्यज्ञानस्यावश्यकत्वम्, प्राशस्त्यादेरन्वयप्रकारश्च, प्राशस्त्याप्राशस्त्यस्वरूपम्, प्राशस्त्याप्राशस्त्यज्ञानस्योपयोगः, स्तुतिनिन्दयोरर्थवादपदैः कथं लक्षणेति विचारः, अर्थवादे स्तुतिः कथं प्रतीयत इति विचारः, अर्थवादानां विधिभिः सह क्वचिद् वाक्यैकवाक्यत्वं भवति न वेति विचारः, प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो भावनामुख्यविशेष्यकशाब्दबोधश्च, लिङर्थसङ्ख्याया नामार्थेऽन्वयो भवति न वेति विचारः, आख्यातलक्ष्ये कर्तरि सङ्ख्यान्वयो भवति न वेति विचारः, तार्किकमतेन प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधकार्यकारणभावप्रदर्शनम्, तत्खण्डनञ्च, मीमांसकमतेन भावनामुख्यविश्येषकशाब्दबोधोपपादनम्, तत्र युक्तिप्रदर्शनं तस्यैवानुभविकत्वञ्च, प्रथमाप्रयोजकः कः, इति विचारः, सम्बोधनप्रथमाप्रयोजकनिरूपणम्, अभिधानानभिधानयोः प्रथमाप्रयोजकविचारस्तत्खण्डनञ्च, आख्यातस्य कर्तृलक्षकत्वे प्रमाणप्रदर्शनम्, कर्तुः सम्बन्धविधया भानमिति मतोपस्थापनं खण्डनञ्च, 'यजेत' इत्यादौ दम्पत्योः सहाधिकारे कर्तृत्वलक्षणम्, भावनामुख्यविशेष्यत्वे युक्तयः,

धात्वर्थ एव भावनेति मतखण्डनम्, आख्यातार्थकालस्य भावनान्वय-प्रकारः, भावनामुख्यविशेष्यत्वे शङ्का तत्परिहारश्च, लिट्-लुट्-लृट्-लेट्-लोट्-लङ्-लुङ्-लिङर्थाः, आत्मनेपदार्थस्यान्वयप्रकारः, भावाख्यातार्थनिरूपणम् ।

ङ) **प्रकरणे**

आख्यातधात्वर्थद्वितीयाविभक्तिविचारः -

धात्वर्थनिरूपणम्, धात्वर्थविचारे मण्डनमिश्रप्राचीननव्यवैयाकरणमतोपस्थापनम्, तत्खण्डनञ्च, पाकपदार्थनिर्वचनम्, पार्थसारथिमिश्रानुसारमाख्यातार्थविचारस्तत्खण्डनञ्च यत्नस्याख्यातार्थत्वञ्च, सकर्मकत्वाकर्मकत्वनिर्वचनम्, तत्र पूर्वोत्तरपक्षौ, शक्यतावच्छेदकविचारः, भावनायाः प्राधान्यमिति निरूपणञ्च, धात्वर्थस्य भावनायां प्रकारतारूपेणान्वयो भावनाया एककर्मकत्वमित्यत्र विचारः, धात्वर्थस्य कर्मत्वेनान्वयः कुत्रकुत्रेति विचारः, कर्मत्वकरणत्वादेर्धातुलक्ष्यत्वमिति विचारः, सुबर्थस्य भावनायामन्वय इत्यत्र विचारः, सम्बोधनार्थस्य भावनायामन्वयः, इति विचारः, प्रथमायाः प्रातिपदिकार्थत्वेनार्थवत्त्वमिति प्रतिपादनम्, नीलगुणस्य घटे भानोपपत्तिः, अरुणयैकहायन्या अभेदभानप्रकारः, प्रथमार्थस्य चैत्रादेराख्यातार्थकर्तरि अभेदेनान्वय इत्यत्र युक्तिप्रदर्शनं खण्डनञ्च, विशेषणप्रथमार्थस्य भावनान्वये विचारः, कात्यायनमतेन प्रथमार्थविचारः, तिङ्निपाताभिहितं कर्तृत्वं प्रथमार्थ इत्यर्थविचारः, लटि तिङोऽभावापत्तिशङ्का तन्निरासश्च, कर्मत्वस्वरूपनिर्वचनम्, कर्मत्वलक्षणेऽव्याप्तिशङ्का तत्परिहारश्च, द्वितीयान्तस्थले शाब्दबोधप्रकारः, भेदव्याप्यवृत्तित्वमते बोधे विशेषः, कर्मणिप्रयोगे शाब्दबोधप्रकारः, भेदे प्रतियोगिनोऽन्वये सम्बन्धविशेषप्रश्नस्तत्समाधिश्च, **घटं जानाती**-त्यादौ शाब्दबोधप्रकारः, कर्मत्वस्य पूर्वपक्षलक्षणं तत्खण्डनमखण्डोपाधिरूपत्वसाधनञ्च, कर्मत्वस्य सखण्डोपाधिरूपत्वे गौरवप्रदर्शनम्, व्युत्पत्त्यानन्त्यप्रदर्शनञ्च, फलं भेदश्च द्वितीयार्थ इति मतखण्डनम्, कर्माख्यातस्य द्वितीयार्थकत्वनिरासः, स्वङ्गच्छतीति प्रयोगवारणप्रकारस्तन्निरासश्च, धात्वर्थस्याखण्डत्वसमर्थनम्, कर्माख्यातस्थलेऽन्वयप्रकारः, द्वितीयादेः कर्मादिकमेवार्थो न कर्मत्वादिकमिति प्राचीनवैयाकरणमतखण्डनम्, सर्वत्रैव विभक्तेर्धर्मिणि शक्तिरस्तु, इति शङ्का तत्परिहारश्च, सविषयकधातुयोगे द्वितीयार्थविचारः, विभक्तौ लक्षणा नास्तीति शङ्का, विभक्तौ लक्षणोपपादनम्, लक्षणायां बाधकाभावः, विभक्तिलक्षणापक्षे दोषपरिहारः, ज्ञातताङ्गीकारेण घटं जानाती-त्यादौ मुख्यकर्मत्वोपपादनम्, अखण्डकर्मत्वादिसद्भावे वार्तिकसम्मतिप्रदर्शनम्, ईप्सितकर्मत्वं द्वितीयार्थः, इति मतं तत्खण्डनञ्च, कर्म चतुर्विधमिति प्रतिपादनम्, द्विकर्मकधातुयोगे द्वितीयार्थविचारः, अकर्मकधातुभिर्योग इत्यादि वार्तिकार्थविचारः, **अधिशीङ्स्थासां कर्म** इत्यादिसूत्राणां विवेचनम्, उपपदद्वितीयाविभक्तीनां विवेचनम्, समयानिकषादिपदयोगे द्वितीयार्थः, कर्मप्रवचनीययोगे द्वितीयार्थः, **तृतीयार्थे हीने**, इति सूत्रार्थविचारः, प्रतिपर्यनूनां लक्षणार्थे बोधप्रकारः, इत्थंभूताख्यानाद्यर्थे बोधप्रकारः, **कालाध्वनोरत्यन्तसंयोगे** इति सूत्रार्थः, मृदु पचतीत्यादौ द्वितीयाविचारस्तत्रवैयाकरणानां मतं तत्खण्डनञ्च, मृदु पचतीत्यादौ मीमांसकमतेन द्वितीयाप्राप्त्युपपादनम्, स्तोकं पचतीत्यादौ त्रेधा द्वितीयार्थान्वयविवेचनम् ।

पाठ्यग्रन्थौ

१. **न्यायरत्नमाला** - नित्यकाम्यविवेकान्ता, पार्थसारथिमिश्रविरचिता ।
२. **भाट्टतन्त्ररहस्यम्** - ग्रन्थस्यादितो द्वितीयाविभक्तिनिरूपणान्तो भागः, आचार्यखण्डदेवप्रणीतम् ।

सन्दर्भग्रन्थाः

१. **वैयाकरणभूषणम्** - कौण्डभट्टविरचितः ।
२. **विधिविवेकः** - मण्डनमिश्रविरचितः ।
३. **वैयाकरणसिद्धान्तमञ्जूषा** - नागेशभट्टरचिता ।
४. **धात्वर्थविज्ञानम्** - डा. भागीरथप्रसादत्रिपाठिरचितम् ।
५. **विभ्रमविवेकः** - मण्डनमिश्ररचितः ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकौ	२	१	२०
		तुलनात्मकौ	२	१	२०
		व्याख्यात्मकौ	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् – नवमम्

पाठ्यांशनाम – स्वशास्त्रेतिहासव्युत्पत्तिनिबन्धरचनाः, तुलनात्मकाध्ययनञ्च ।

पाठ्यांशगतोद्देश्यम्

१. अध्ययनाध्यापनविधिविचारधर्माधर्मविधिस्वरूपधात्वर्थविधिवादशाब्दबोधवेदापौरुषेयत्वाख्यातिवादादिविषयाणां निर्वचनम्।
२. वेदस्वरूपोपस्थापनपूर्वकं वेदानां त्रिविधत्वं चतुर्विधत्वं वेति विज्ञानम् ।
३. मीमांसाशास्त्रान्तर्गतधर्मस्वरूपार्थवादानां सम्यगवगमः ।
४. ब्राह्मणभागानां वेदत्वं ब्राह्मणारण्यकोपनिषच्छ्रूपाणां प्रतिपादनम्।
५. अभिहितान्वयान्विताभिधानवादविज्ञानम्, प्रमाणविषये दर्शनान्तरैः सह मीमांसायास्तुलनात्मकमध्ययनम्, मीमांसकनैयायिकवैयाकरणसिद्धान्तावबोधनञ्च ।
६. स्वशास्त्रपरिचयव्युत्पत्तिनिबन्धेतिहासज्ञानपूर्वकश्रौताधानाग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमयागानां सामान्यज्ञानम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	मीमांसाशास्त्रीयेतिहासः	३६	२०
ख	मीमांसाशास्त्रीया व्युत्पत्तिः	३६	२०
ग	मीमांसाशास्त्रीयनिबन्धरचना	३६	२०
घ	मीमांसाशास्त्रस्य केषाञ्चिद् विषयाणां शास्त्रान्तरैर्मीमांसान्तरैश्च तुलनात्मकमध्ययनम्	३६	२०
ङ	श्रौतयज्ञनिरूपणम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

मीमांसाशास्त्रीयेतिहासः –

वेदस्वरूपोपस्थापनम्, वेदानां त्रिविधत्वं चतुर्विधत्वञ्चेति विचारः, ब्राह्मणस्वरूपम्, ब्राह्मणलक्षणम्, ब्राह्मणस्य त्रिविधत्वम्, विधिविचारः, विधेर्भेदाः, अर्थवादस्वरूपम्, अर्थवादस्य भेदचतुष्टयम्, अर्थवादत्रैविध्यम्, चतुर्वेदप्रतिपाद्यविषयाः, पूर्वमीमांसाया वेदार्थविचारस्य आवश्यकत्वप्रतिपादनम्, पूर्वमीमांसाया द्वादशाध्यायगतविषयाणां पर्यालोचनम्, मीमांसाशास्त्रस्यावतारः कथमिति विचारः, मीमांसाशब्दप्रयोगः, वाक्यशास्त्रमिदम्, मीमांसाशास्त्रस्याद्याचार्यः, मीमांसाशास्त्राध्ययनस्य कालः, महर्षेर्जैमिनेः परिचयः, बौधायनस्य परिचयः, उपवर्षभवदासपरिचयः, भाष्यकारस्य शवरस्वामिनः परिचयः, भाष्यटीकाकर्तुः कुमारिलभट्टस्य परिचयः, मण्डनमिश्रस्य परिचयः, पार्थसारथिमिश्रस्य परिचयः, आचार्यसायणस्य परिचयः, माधवाचार्यस्य परिचयः, खण्डदेवमिश्रस्य परिचयः, नारायणभट्टस्य परिचयः, प्रभाकरमिश्रस्य परिचयः, शालिकनाथस्य परिचयः, नन्दीश्वरस्य परिचयः, रामानुजाचार्यस्य परिचयः, मुरारिमिश्रस्य परिचयः ।

ख) प्रकरणे

मीमांसाशास्त्रीया व्युत्पत्तिः -

धर्माधर्मस्वरूपविवेचनम्, अध्ययनाध्यापनविधेर्विचारः, विधि-स्वरूपविचारः, धात्वर्थविचारः, विधिवादः, प्रथमान्तार्थमुख्यविशेष्य-कशाब्दबोधविचारः, भावनाविचारः, भावनामुख्यविशेष्यकशाब्दबोध-आख्यातार्थधात्वर्थयोर्विशेषविचारः, प्रथमादिसप्तम्यन्तविभक्त्यर्थ-विचारः, अभिहितान्वयान्विताभिधानवादयोः समीक्षणम्, अपूर्व-साधनम्, मीमांसानुसारं प्रमाणविचारः, वेदस्यापौरुषेयत्वम्, वेदविभाग-विषयाः, स्वतः प्रामाण्यवादः, भ्रमस्थलेऽख्यातिवादः, अन्यथाख्याति-वादः, अनिर्वचनीयख्यातिवादश्च, भट्टप्रभाकरमुरारिमिश्रमतभेदेन पदार्थ-विचारः, मीमांसायामात्मविचारः, मीमांसायां शक्तिविचारः, शक्तेर्द्वैविध्यं त्रैविध्यञ्चेति, शब्दशक्तिविचारः, मीमांसायां मोक्षविचारः, ईश्वरविचारः, मीमांसानुसारं मोक्षसाधनम्, मीमांसानुसारं कर्मविचारः, प्रामाण्या-प्रामाण्ययोः स्वतस्त्वपरतस्त्वविचारः, शाबरभाष्यस्य वैशिष्ट्यम्, शास्त्रदीपिकाया वैशिष्ट्यम्, प्रकरणपञ्चिकाया वैशिष्ट्यम्, श्लोकवार्तिकस्य वैशिष्ट्यम् ।

ग) प्रकरणे

मीमांसाशास्त्रीयनिबन्धरचना -

वर्तमानसमये मीमांसाशास्त्रस्योपयोगः, अर्थवादविवेचनम्, धर्मस्वरूपविचारः, अदृष्टविचारः, मीमांसायां भावनाविचारः, कर्मभेद-विचारः, शबरस्य जैमिनिसूत्रव्याख्यापद्धतिः, पार्थसारथिमिश्रस्य मीमांसासूत्रव्याख्यापद्धतिः, हविर्यज्ञानां परिचयः, ब्राह्मणभागस्य वेदत्व-विचारः, वैदिको बहुदेवतावादः, कल्पसूत्रस्य महत्त्वम्, ब्राह्मणग्रन्थानां महत्त्वम्, मीमांसाशास्त्रस्य महत्त्वम्, वेदस्यापौरुषेयत्वम्, उपनिषदां विषयाः, आरण्यकग्रन्थानां परिचयः, ब्राह्मणत्वादिजातिः, शब्दस्य द्रव्य-त्वम्, वार्तिकग्रन्थस्य महत्त्वम्, नामधेयम्, स्वर्गः, मोक्षः, शब्दानां साधुत्वासाधुत्वविचारः, सामान्यविशेषातिदेशयोर्महत्त्वम्, ऊहबाधस्य महत्त्वम्, तन्त्रप्रसङ्गस्य महत्त्वम्, मीमांसायां मतत्रयम्, कुमारिलपर-

म्पराया विचारः, प्रभाकरपरम्पराविचारः, द्वादशलक्षणी पूर्वमीमांसा, शब्दस्य नित्यत्वम्, धर्मस्य ज्ञापकं प्रमाणम्, श्रुतिज्ञानम्, स्मृतिप्रमाणम्, मीमांसाशास्त्रस्य प्रयोजनम्, निषेधस्वरूपम्, पर्युदासस्वरूपम् ।

घ) प्रकरणे

मीमांसाशास्त्रस्य केषाञ्चिद् विषयाणां शास्त्रान्तरैर्मीमांसा-न्तरैश्च तुलनात्मकमध्ययनम् -

अभिहितान्वयान्विताभिधानवादयोस्तुलनात्मकमध्ययनम्, शब्दनित्यत्वसम्बन्धे वैयाकरणमीमांसकमतयोस्तुलनात्मकमध्ययनम्, व्यापारमुख्यविशेष्यकशाब्दबोधे मीमांसकवैयाकरणयोस्तुलनात्मक-मध्ययनम्, पदार्थविचारे प्रभाकरकुमारिलयोस्तुलनात्मकमध्ययनम्, हेत्वा-संयोगसम्बन्धविचारे मीमांसकनैयायिकयोस्तुलनात्मकमध्ययनम्, मनसः स्वरूप-भासविचारे नैयायिकमीमांसकयोस्तुलनात्मकमध्ययनम्, अनुपलब्धिप्रमाण-विचारे नैयायिकमीमांसकयोस्तुलनात्मकमध्ययनम्, उपमानप्रमाणविषये विषये नैयायिकमीमांसकयोस्तुलनात्मकमध्ययनम्, परमाणुस्वरूपविषये तार्किक-तार्किकमीमांसकयोस्तुलनात्मकमध्ययनम्, शब्दप्रामाण्यविषये नैयायिकमीमांसक-भाट्टमतयोस्तुलनात्मकमध्ययनम्, अध्ययनविधिवाक्ये भाट्टप्रभाकरयोर्मत-योस्तुलनात्मकमध्ययनम्, जातिविषये बौद्धमीमांसकयोस्तुलनात्मकमध्ययनम्, धर्म-प्रदर्शनम्, लक्षणप्रतिपादनसम्बन्धे भाट्टप्राभाकरयोः पार्थक्यप्रतिपादनम्, विधि-प्रत्ययस्यार्थप्रतिपादनसम्बन्धे भाट्टप्रभाकरयोस्तुलनात्मकमध्ययनम्, शब्दार्थभावनायास्तुलनात्मकमध्ययनम्, चक्षुरादीन्द्रियाणां प्राप्यकारित्वा-प्राप्यकारित्वसम्बन्धे बौद्धमीमांसकयोस्तुलनात्मकमध्ययनम् ।

ङ) प्रकरणे

श्रौतयज्ञनिरूपणम् -

यज्ञस्वरूपम्, वैदिककर्मणां पञ्चविधत्वम्, स्मृतिप्रतिपादिता-नामेकविंशतियज्ञानां स्वरूपज्ञानम्, स्मार्ताग्न्याधानकालः, स्मार्तेऽग्नौ कर्तव्यं कर्म, औपासनहोमः, श्रौताधानकालः, तत्राधिकारिविचारः, अग्निहोत्रे द्रव्यं देवता च, दर्शपूर्णमासयागः, दर्शपूर्णमासयोः प्रकृतित्व-

प्रतिपादनम्, दर्शपूर्णमासयागीयपदार्थाः, चातुर्मास्ययागपरिचयः, प्रथम-वैश्वदेवपर्वपरिचयः, द्वितीयवरुणप्रघासाख्यपर्वपरिचयः, सौत्रामणीयाग-परिचयः, सोमयागपरिचयः, सोमयागे ऋत्विक्सङ्ख्या, ऋत्विजां दक्षिणा-विचारः, सोमयागस्य प्रथमदिने कर्तव्यं कर्म, द्वितीयदिनकर्तव्यं कर्म, तृतीयचतुर्थपञ्चमदिनकर्तव्यकर्माणि, महाभिषवक्षुल्लकाभिषवयोः परिचयः, ऋत्विजामुपवेशप्रकारः, सवनीयपशुः, चमसभक्षः, माध्यन्दिनं सवनम्, तृतीयं सवनम्, अवभृथस्नानादिकम्, द्वादशाहयज्ञः, वाजपेययज्ञः, राजसूययज्ञः ।

सन्दर्भग्रन्थाः

१. **भारतीयदर्शनम्** – मीमांसादर्शनविषयसम्बद्धो भागः, बलदेवोपाध्यायनिर्मितम् ।

२. **दर्शनामृतम्** – उपोद्घातसहित–मीमांसादर्शनविषयको भागः, बुद्धिसागररचितम् ।

३. **शावरभाष्यभूमिका** – चौखम्भासंस्करणम् ।

४. **प्रकरणपञ्चिका** – भूमिकाभागः, शालिकनाथकृता ।

५. **कात्यायनश्रौतसूत्रसरलाभूमिका** – पं. विद्याधरगौडरचिता।

६. **भाट्टदीपिका** – खण्डदेवकृता ।

७. **न्यायरत्नमाला** – पार्थसारथिमिश्ररचिता ।

८. **मानमेयोदयः** – नारायणभट्टकृतः ।

९. **भाट्टतन्त्ररहस्यम्** – खण्डदेवप्रणीतम् ।

१०. **मीमांसापदार्थविज्ञानम्** – डा. काशीनाथरचितम् ।

११. **मीमांसामयूख** – प्रा. चूडानाथ भट्टराय ।

१२. **मीमांसान्यायमञ्जरी** – पद्मभूषणपण्डितश्रीपट्टाभिरामशास्त्रिरचिता ।

१३. **यज्ञतत्त्वप्रकाशः** – म.म. चिन्नस्वामी मोतीलाल, बनारसीदास।

१४. **तौताततिमततिलकम्** – भवदेवविरचितम् ।

१५. **मीमांसादर्शन** – डा. मण्डन मिश्र ।

१६. **हिन्दी शाबरभाष्य** – भूमिका भाग, युधिष्ठिर मीमांसक ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकौ	२	१	२०
		तुलनात्मकौ	२	१	२०
		व्याख्यात्मकौ	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - दशमम्

पाठ्यांशनाम- विशिष्टाध्ययनम्

पाठ्यांशगतोद्देश्यम्

१. शबरमुनिप्रणीतभाष्यानुसारं यज्ञकर्मणां तात्पर्यबोधकगवेषणात्मकमध्ययनम् ।

२. भाष्यप्रतिपादितशास्त्रगततत्त्वार्थज्ञानश्रुतिबोधकस्वर्गादिफलसाधनप्रकृति–विकृतियागगम्येष्टानिष्टकर्मप्रतिपादकशब्दार्थसम्बन्धात्मकविचारावगतिः ।

३. वेदार्थविमर्शनरूपस्य मीमांसाशास्त्रस्योद्देश्यत्वमर्थनिर्णयात्मकत्वम्, नित्यनैमित्तिककाम्यनिषिद्धकर्मविवेचनात्मकाधिकारानधिकारविधिविज्ञाने भाष्यानुगतविचारेण तात्पर्यावबोधनञ्च ।

४. प्रकृतिविकृतिमुख्ययागावान्तरयागहोमोपहोमेष्टिप्रकृतिविकृतिभावाङ्गाङ्गिभावाधिकारसामान्यविशेषातिदेशोहबाधतन्त्रप्रसङ्गगतवस्तुतत्त्वार्थविषयाणां भाष्योक्तरीत्या विशिष्टाध्ययनम् ।

५. शास्त्रतत्त्वार्थोक्तभाष्यनिर्वचनविचारतत्त्वविमर्शादिशब्दानामालोचनपुरःसरं समविषमतादिज्ञानजन्यार्थतत्त्वार्थनिर्णयोपपादनम्।

६. यज्ञकर्मण्यधिकारानधिकारप्रकृतिविकृतियागार्थाधानाग्निहोत्र-दर्शपूर्णमासचातुर्मास्यपशुसोमयागानां शास्त्रतत्त्वार्थयुतभाष्यार्थानुगतविचारशैल्या विवेचनात्मकमध्ययनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	अधिकारानधिकारनिरूपणम्	३६	२०
ख	सामान्यविशेषातिदेशनिरूपणम्	३६	२०
ग	ऊहविचारनिरूपणम्	३६	२०
घ	बाधविचारनिरूपणम्	३६	२०
ङ	तन्त्रप्रसङ्गनिरूपणम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

अधिकारानधिकारनिरूपणम् -

यागादिक्रियाणां स्वर्गफलसाधनत्वविचारः , यागादिषु मनुष्यस्यैवाधिकारविचारः, यागादिषु स्त्रीपुंसयोरुभयोरधिकारविचारः, यागे शूद्रस्यानधिकारविचारः, यागे निर्धनस्याप्यधिकारप्रतिपादनम्, दर्शपूर्णमासयोस्त्र्यार्षेयस्यैवाधिकारप्रतिपादनम्, रथकारस्याधानाधिकारनिरूपणम्, निषादस्थपतिन्यायविचारः, सत्रे प्रत्येकस्य सत्रिणः फलसम्बन्धे विचारः, दर्शादौ कर्त्रैक्यनियमविचारः, कलञ्जन्यायविचारः, अग्निहोत्रन्यायविचारः , अग्निहोत्रादिकर्मणां स्वकालावृत्त्या आवृत्त्यधिकरणनिरूपणम्, दर्शादौ भेदाद्यावृत्त्या होमावृत्त्यधिकरणप्रतिपादनम्, नित्ये यथाशक्त्यङ्गानुष्ठानविचारः, अङ्गवैकल्ये काम्यस्य निष्फलत्वविचारः, प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावविचारः, स्वामिनः प्रतिनिध्यभावविचारः, पूतीकस्य सोमप्रतिनिधित्वविचारः, अवत्तनाशे पुनरवदानार्थं प्रतिनिध्यादानविचारः, स्विष्टकृदर्थस्यावत्तस्य नाशे पुनरशेषा-

वदानविचारः, ऋत्विजामेव शेषभक्षणविचारः, पञ्चशराव-निर्वापस्य सह कर्मान्तरविचारः, पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गत्वम्, दर्शेऽभ्युदयेऽष्टौ नैमित्तिकशाखयेत्यस्य कालविधानार्थत्वनिरूपणम्, उपांशुयागेऽपि देवतापनयविचारः, सन्नयदसन्नयदेवतापनयाधिकरणम्, सत्राय प्रवृत्तमात्रस्य विश्वजिद्दुभयस्यैवाभ्युदये प्रायश्चित्तविचारः, दीक्षापरिमाणस्य द्वादशाहत्वनियमनिरूपणम्, सत्रे समानकल्पानां सहाधिकारनिरूपणम्, भिन्नकल्पयोरपि राज्ञः पुरोहितस्य च कुलाययज्ञेऽधिकारविचारः, सत्रे ब्राह्मणमात्रस्याधिकारविचारः, सत्रे विश्वामित्रतत्समानकल्पानामेवाधिकारविचारः, सत्र आहिताग्नेरेवाधिकारविचारः, विश्वजिति अश्वादीनामदेयत्वविचारः, विश्वजिति विद्यमानानामेव सर्वस्वानां दानविचारः, सहस्रसंवत्सरशब्दस्य सहस्रदिनपरत्वविचारः, अथानाहिताग्नेरेव चतुर्होतृहोमाधिकारविचारः, अनाहिताग्निषूपनयनहोमाधिकरणनिरूपणम्, अनाहितेऽग्नौ स्थपतीष्ट्यधिकरणप्रतिपादनम्, ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यत्वविचारः, अपररात्रे व्रतस्यानियमविचारः, छागस्यैवाग्नीषोमीयपशुताऽधिकरणनिरूपणम् ।

ख) प्रकरणे

सामान्यविशेषातिदेशनिरूपणम् -

प्रयाजादिधर्माणां प्रकृतिमात्रार्थताप्रतिपादनम्, इषौ श्येनीयवैशेषिकधर्मातिदेशप्रतिपादनम्, वारुणप्रघासिकपञ्चसञ्चरेषु वैश्वदेविकसार्थवादविधिकाण्डातिदेशप्रतिपादनम्, साकमेधीयैन्द्राग्नैककपालयोः सार्थवादविधिकाण्डातिदेशप्रतिपादनम्, साकमेधैककपाले वारुणप्रघासिकैककपालधर्मातिदेशप्रतिपादनम्, रथन्तरादिशब्दानां गीतिविशेषवाचित्वप्रतिपादनम्, अग्निहोत्रादिनाम्नां धर्मप्रदेशकत्वप्रतिपादनम्, प्रायणीयनाम्नां धर्मानतिदेशकत्वप्रतिपादनम्, विश्वजिति षडाहिकषट्पृष्ठातिदेशप्रतिपादनम्, अवभृथनाम्नः सौमिकावभृथधर्मातिदेशकत्वप्रतिपादनम्, वारुणप्रघासिकावभृथस्य तुषनिष्कासनद्रव्यकत्वप्रतिपादनम्, निर्मन्थ्यादिशब्दानां धर्मानतिदेशकत्वप्रतिपादनम्, प्रणयनशब्दस्य सौमिकप्रणयनधर्मानतिदेशकत्वप्रतिपादनम्, अनो-वास-प्रभृतिशब्दा-

नामाकृतिनिमित्तताप्रतिपादनम्, गर्गत्रिरात्रे लौकिकाग्नेरुपनिधेयत्वप्रति-पादनम्, उपशमे यूपशब्दस्य संस्कारानतिदेशकत्वप्रतिपादनम्, पृष-शब्दस्य ऋङ्मन्त्रवाचित्वप्रतिपादनम्, अविहितेतिकर्तव्यताके सौर्यादिष्वितिकर्तव्यताया अतिदेशप्रतिपादनम्, सौर्यादौ वैदिक्या एव इतिकर्तव्यताया अतिदेशप्रतिपादनम्, गवामयनिकज्योतिरादिष्वेकाह-काण्डपठितज्योतिरादिधर्मानुष्ठानप्रतिपादनम्, विशेषातिदेशप्रतिज्ञा, सादृश्यविशेषेण नियतप्रकृतितो धर्मातिदेशप्रतिपादनम्, सोमे, ऐष्टिक-धर्मानतिदेशप्रतिपादनम्, ऐन्द्राग्नादिषु दार्शपूर्णमासिकधर्मातिदेशप्रति-पादनम्, अग्नीषोमीये पशौ दार्शपूर्णमासिकधर्मातिदेशप्रतिपादम्, सौर्ये चरावाग्नेयधर्मातिदेशप्रतिपादनम्, आमिक्षायागे पयोयागधर्मातिदेश-प्रतिपादनम्, आग्नावैष्णवादौ देवतासामान्यादग्नीषोमीयादिधर्मातिदेश-प्रतिपादनम्, जनकसप्तरात्रे द्वादशाहिकानां सप्तानामह्नां क्रमेण धर्माति-देशप्रतिपादनम्, षट्त्रिंशद्रात्रे षडहधर्मातिदेशप्रतिपादनम्, शतोक्थ्यादि-संस्थागणेषु द्वादशाहिकधर्मातिदेशप्रतिपादनम्, शतोक्थ्यादौ ज्योतिष्टोमि-कोक्थ्यादिस्तोत्रानुष्ठानप्रतिपादनम्, बृहस्पतिसवादौ दाशतयीष्व्य उत्पन्नगायत्रीणां समानयनप्रतिपादनम्, दर्विहोमशब्दस्य कर्मनामधेय-त्वप्रतिपादनम्, दर्विहोमशब्दस्य स्मार्तानां वैदिकानां च कर्मणां नामधेयत्वप्रतिपादनम्, दर्विहोमशब्दस्य होमनामधेयत्वप्रतिपादनम्, दर्विहोमशब्दस्य गुणविधित्वनिराकरणप्रतिपादनम्, दर्विहोमानाम-पूर्वताप्रतिपादनम्।

ग) प्रकरणे

ऊहविचारनिरूपणम् -

धर्माणामपूर्वप्रयुक्तत्वविचारः, वाक्यविनियुक्तेषु प्रोक्षणादि-सन्निपत्योपकारकेष्वपूर्वप्रयुक्तत्वविचारः, दीक्षणीयावाङ्नियमविचारः, धर्माणां देवताप्रयुक्तत्वाभावप्रतिपादनम्, श्रुतिविनियुक्तप्रोक्षणादि-धर्माणामपूर्वप्रयुक्तत्वप्रतिपादनम्, अग्नौ प्रोक्षणादेः सकृदनुष्ठान-प्रतिपादनम्, दर्शपूर्णमासयोरन्वारम्भणीयायाः सकृदनुष्ठानप्रतिपादनम्, सूक्तवाके श्रूयमाणस्य यजमानपदस्य विकृतावूहप्रतिपादनम्, गिरापद-स्थानापन्नेरापदे गानकर्तव्यत्वप्रतिपादनम्, सामादिशब्दानां गीतिवाचित्व-

प्रतिपादनम्, साम्नामृक्संस्कारकर्मत्वेन प्राधान्यप्रतिपादनम्, समान-च्छन्दस्कास्वेव तिसृषु ऋक्षु गानप्रतिपादनम्, गीत्युपायानां शाखाभेदेन समाम्नातानां विकल्पप्रतिपादनम्, ऋग्यजुर्मन्त्राणां तानस्वरेण कर्मणि प्रयोगप्रतिपादनम्, कण्वरथन्तरेऽविरुद्धानां बृहद्रथन्तरधर्माणां समुच्चय-प्रतिपादनम्, पार्वणहोमयोर्विकृतावनतिदेशप्रतिपादनम्, समिदादिपदानां नामधेयत्वेन प्रयाजानामारादुपकारकत्वप्रतिपादनम्, सौर्यादिविकृतावति-दिष्टमन्त्रे वैकृतद्रव्यादिवाचकपदोहप्रतिपादनम्, लौकिकयूपस्पर्शे पुरुषार्थतया प्रायश्चित्तविधानप्रतिपादनम्, बहुवचनान्तपाशमन्त्रस्य विकल्पेन प्रकरण एव निवेशप्रतिपादनम्, दर्शपूर्णमासयोर्द्विबहुपत्नीक-प्रयोगे पत्नीमन्त्रस्यानूहप्रतिपादनम्, पशुधर्मसमानविध्यपक्षे प्रास्मा इत्यध्रिगुप्रैषस्याविकारप्रतिपादनम्, पशुगणेऽध्रिगुप्रैषगतैकधाशब्दस्य यावत्त्वचमभ्यासप्रतिपादनम्, पशुगणेऽध्रिगुप्रैषे समस्तवङ्क्रीयत्ता-प्रकाशनार्थं समस्त वचनप्रतिपादनम्, अश्वमेधेऽश्वविषये षडशीतिरेषां वङ्क्रय इति समासवचनप्रतिपादनम्, अध्रिगुप्रैषगतप्रशंसाशब्दस्य बाहूप्रशंसापरत्वप्रतिपादनम्, धार्याग्निनाशे ज्योतिष्मतीष्टेरननुष्ठान-प्रतिपादनम्, प्रायणीयेष्टौ पयसि प्रदेयधर्माननुष्ठानप्रतिपादनम्, पशुकामेष्टौ दधिशृतयोः प्रदेयधर्माननुष्ठानप्रतिपादनम्, आज्येन शेषं संस्थापयतीति वाक्ये कर्मान्तरविधानप्रतिपादनम्।

घ) प्रकरणे

बाधविचारनिरूपणम् -

विकृतौ लुप्तार्थकानां प्राकृतानामङ्गानां बाधप्रतिपादनम्, कृष्ण-लचरावववघातबाधप्रतिपादनम्, ज्योतिष्टोमाद्यङ्गभूतदीक्षणीयादिविकृता-वन्वारम्भणीयाया बाधप्रतिपादनम्, राजसूयान्तर्गतानुमत्यादीष्टावन्वा-रम्भणीयाया बाधप्रतिपादनम्, खलेवाल्यां यूपाहुतेरननुष्ठानप्रतिपादनम्, उत्तमप्रयाजस्य संस्कारकर्मत्वप्रतिपादनम्, कृष्णलचरौ पाकानुष्ठान-प्रतिपादनम्, कृष्णलचरावुपस्तरणाभिघारणयोर्लोपप्रतिपादनम्, कृष्ण-लचरौ भक्षणकर्तव्यत्वप्रतिपादनम्, सत्रे वरणाननुष्ठानप्रतिपादनम्, सत्रे परिक्रयाननुष्ठानप्रतिपादनम्, पश्वादिविकृतावुपदिष्टैरेकादशप्रयाजादि-भिरङ्गैः प्राकृताङ्गान्तराबाधप्रतिपादनम्, वायव्यपशौ हिरण्यगर्भमन्त्र-

स्यौत्तराघारेनिवेशप्रतिपादनम्, अग्निचयनप्रकरणे श्रुतानां दीक्षाहुतिमन्त्राणां सौमिकदीक्षाहुतिमन्त्रैः समुच्चयप्रतिपादनम्, आग्रयणेऽन्वाहार्यस्थानापन्ने वाससि पाकाननुष्ठानप्रतिपादनम्, ज्योतिष्टोमे दक्षिणान्तर्गतिष्वेव द्वादशशतसङ्ख्यानिवेशप्रतिपादनम्, ज्योतिष्टोमे द्वादशोत्तरशतगोदक्षिणाया विभज्य दानप्रतिपादनम्, नक्षत्रेष्ट्यादावुपदिष्टैरुपहोमादिभिरातिदेशिकानां नारिष्टहोमादीनां बाधाभावप्रतिपादनम्, सोमारौद्रयाग उपदिष्टैः शरैरातिदेशिकानां कुशानां बाधप्रतिपादनम्, महाव्रते तार्प्यादिभिः प्राकृताहतवाससः समुच्चयप्रतिपादनम्, अग्निष्टुद्यागे स्तोत्रशस्त्रमन्त्राणां प्राकृतानामेवाविकारेण प्रयोगप्रतिपादनम्, चातुर्मास्येषु अनुयाजीयदेवताप्रकाशनार्थं प्राकृतावाह्वानमन्त्रस्याविकारेणैव प्रयोगप्रतिपादनम्, विकृतावेकदेशग्रहणे यावत्सङ्ख्यमाद्यानामेव ग्रहणप्रतिपादनम्, एकत्रिके क्रतौ माध्यन्दिनपवमानस्तोत्र आद्य एव तृचे गानप्रतिपादनम्, एकत्रिके क्रतावेकस्या एव ऋचस्त्रिरभ्यासेन त्रिकस्तोमकधूर्गानानुष्ठानप्रतिपादनम्, द्वि रात्राद्यहर्गणेषु द्वादशाहिकदशाहधर्माणामनुष्ठानप्रतिपादनम्, यज्ञे रथन्तरादिसाम्नां तृचेगानप्रतिपादनम्, वीक्षणे स्वर्दृक्पदपाठकालविधानप्रतिपादनम्, गवामयनिके पृष्ठ्यषडहे बृहद्रथन्तरयोः प्रत्यहमेकैकस्यैवानुष्ठाननिरूपणम्, प्रायणीयो–दयनीययोरैकादशिनानां विभज्यानुष्ठानप्रतिपादनम्, अग्नीषोमीये पशौ हृदयाद्यङ्गानामेव हविष्ट्वप्रतिपादनम्, हृदयादीनामेवावदानसम्बन्धितया श्रूयमाणानां हविष्ट्वेन तदितरावयवानां हविष्ट्वपरिसङ्ख्याप्रतिपादनम्, अनुयाजमहापितृयज्ञयोर्येयजामहहोतृवरणपर्युदासप्रतिपादनम्, सोमे, आज्यभागप्रतिषेधस्य नित्यानुवादत्वेन पशावाज्यभागप्रतिषेधार्थवादार्थत्वप्रतिपादनम्, अतिरात्रे षोडशिग्रहणप्रतिषेधप्रतिपादनम्, जार्तिलयवाग्वादिनिषेधस्य पयोहोमविध्यर्थवादत्वप्रतिपादनम् ।

ङ) **प्रकरणे**

तन्त्रप्रसङ्गनिरूपणम् -

आग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलकत्वप्रतिपादनम्, अङ्गानामैककार्यार्थत्वप्रतिपादनम्, काम्यकर्मणां भूयोऽभ्यासप्रतिपादनम्, अवघातादीनामातण्डुलानिर्वृत्तेरभ्यासप्रतिपादनम्, प्रयाजादीनामङ्गानां

सकृदनुष्ठानप्रतिपादनम्, कपिञ्जलन्यायः, आग्नेयादीनां प्रधानानामेकदेशकालकर्तृकत्वप्रतिपादनम्, दर्शपूर्णमासेष्टिप्रभृतिषु सङ्ग्भेदेनानुष्ठानप्रतिपादनम्, वसाहोमस्य तन्त्रताप्रतिपादनम्, भिन्नदेवताकपशुगणे वसाहोमस्याऽऽवृतियूपाहुतेस्तन्त्रत्वप्रतिपादनम्, अवभृथेऽप्सुसाङ्गप्रधानानुष्ठानप्रतिपादनम्, वरुणप्रघासेषु दक्षिणविहारे पृथगङ्गानुष्ठानप्रतिपादनम्, वरुणप्रघासेषु कर्तॄणां तन्त्रताप्रतिपादनम्, ब्रह्मसामकाले प्राजापत्यानां पशूनामालम्भोत्कर्षमात्रविधानप्रतिपादनम्, अग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकारनिरूपणम्, पुरोडाश आज्यभागयोः कर्तव्यत्वप्रतिपादनम्, सोमाङ्गेष्टिपश्वादिषु सौमिकवेद्या दार्शिकवेदे प्रसङ्गताप्रतिपादनम्, शामित्रे पशुपुरोडाशाश्रपणाभावप्रतिपादनम्, ज्योतिष्टोमे हविर्धानशकटभिन्नशकटान्तरे पशुपुरोडाशादीनां हविर्निर्वापादीनामनुष्ठानप्रतिपादनम्, वरुणप्रघासेषु दक्षिणविहारे प्रतिप्रस्थात्रा पृथङ्मन्त्रोच्चारणप्रतिपादनम्, सोमे दीक्षणीयादिषु दार्शिकाग्निसमिन्धनाभावप्रतिपादनम्, दार्शिकव्रताननुष्ठानप्रतिपादनञ्च, सोमाङ्गेष्टिपश्वादिषु दार्शिकाग्न्यान्वाधानप्रसङ्गस्याक्षेपस्तत्समाधानञ्च, सोमाङ्गेष्टिपश्वादिषु पत्नीसन्नहनाननुष्ठानप्रतिपादनम्, सोमाङ्गेषु प्रायणीयादिषु सौमिकेन पयोव्रतेनाऽऽतिदेशिकस्याऽऽरण्याशनस्य प्रसङ्गप्रतिपादनम्, सोमाङ्गेष्टिपश्वादिषु शेषभक्षणानुष्ठानप्रतिपादनम्, सोमाङ्गदीक्षणीयादिषु दक्षिणाविचारः, शेषभक्षाणां प्रसङ्गाभावविचारः, सोमाङ्गेष्टिपश्वादिषु दार्शिकहोतृवरणविचारः, गार्हपत्याद्यग्निषु लौकिककर्मानुष्ठानप्रतिपादनम्, सवनीयपशौ पशुपुरोडाशकर्तव्यत्वप्रतिपादनम्, सवनीयपुरोडाशेषु हविष्कृदाह्वानाभावप्रतिपादनम्, अष्टरात्रे वत्सत्वाहतवाससोः समुच्चयप्रतिपादनम्, एकस्मिन् कर्मणि भिन्नकार्याणां गुणानां समुच्चयः, प्रतिपादनकार्याणां विकल्पप्रतिपादनञ्च, दोषनाशकानां प्रायश्चित्तानां विकल्पप्रतिपादनम्, अदोषनाशकानां प्रायश्चित्तानां समुच्चयप्रतिपादनम्, अनध्यायादावपि कर्मकालमन्त्रप्रयोगप्रतिपादनम्, जपादिमन्त्रेषु मन्त्रस्वरनियमविचारः, जपस्तुत्याशीरभिधानमन्त्राणां समुच्चयप्रतिपादनम्, सोमक्रयद्रव्याणां समुच्चयप्रतिपादनम्, पशुगणे पत्नीसंयाजेषु जाघनीनां विकल्पप्रतिपादनम्, काम्येनाग्निना नित्यस्योख्याग्नेर्विकारविचारः, काम्येऽग्ना-

वाधानादिसंस्कारलोपप्रतिपादनम्, सत्रे यजमानसंस्काराणां सर्वार्थत्वप्रतिपादनम्, ब्राह्मणस्यैवार्त्विज्येऽधिकारप्रतिपादनम् ।

पाठ्यग्रन्थः

१. **शावरभाष्यम्** – षष्ठाध्यायतो द्वादशाध्यायपर्यन्तभागयुतम्, शवरस्वामिविरचितम् ।

सन्दर्भग्रन्थाः

१. **अध्वरमीमांसाकुतूहलवृत्तिः** – षष्ठाध्यायतो द्वादशाध्यायपर्यन्तभागयुता ।

२. **शास्त्रदीपिका** – षष्ठाध्यायतो द्वादशाध्यायान्तभागयुता, पार्थसारथिमिश्रविरचिता ।

३. **भाट्टदीपिका** – षष्ठाध्यायतो द्वादशाध्यायान्तभागयुता ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकौ	२	१	२०
		तुलनात्मकौ	२	१	२०
		व्याख्यात्मकौ	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

❀